सरस्वती-
कण्ठाभरणम्
पत्राणि १६०
३२०

नं: ३३२-घ
सरस्वती कण्ठा-
भरणम
पत्राणि १६०
३२०

=ज्योत्स्नोत्पलयोर्योगादिति-सामानाधिकरण्ययोगादित्यर्थः।२=

वस्तुनः प्राधान्यमवगम्यते। तस्य त्वपङ्क्तिपतत्स्यर्थप्रधानमेवैतत्॥ अयुक्तं यथा। इदमार्द्रस्मितज्योत्स्नं स्नि
ग्धनेत्रोत्पलं मुखं। जगन्नेत्रेन्दुरस्माकं कथं तापाय कल्पते। अत्र ज्योत्स्नोत्पलयोर्योगाज्जगन्नेत्रेन्दोश्च मुखस
संतापकरणादिरमयुक्तेनांगिप्रधानरूपकभेदत्वर्थेऽप्यपि रूपकभेदः। अत्रापि पूर्ववन्मुखाख्यस्य व
स्तुनो विशेषणैः परिष्करणमिति तस्यैव प्राधान्यमवगम्यते॥ ॥भेदानंगप्रधानस्य चतुरोऽवयवाश्रयान्। सह
जाहार्यतद्योगतद्वैषम्यैः प्रचक्षते। तेषु सहजावयवं यथा। पप्फुरिअउट्ठदलं तक्खणविग्गलिअरुहिरमहुविछ
उं॥ उक्खडिअकंठनालं पडिअं फुरदसणकेसरं मुहकमलं। अत्रौष्ठादीनां दलादीनां च मुखांभोजावयवा
नां स्फुरितविगलितोत्खडितस्फुरद्विशेषणविशिष्टानां परस्परमुपमानोपमेयभावरूपितानां मुखपक्षे क

=प्रस्फुरितोष्ठदलं तत्क्षणाद्विगलितरुधिरमधुसम्भृतं उत्खण्डितकण्ठनालं पतितं स्फुरद्दशनकेसरं मुखकमलं।२=

=सहजत्वमिति मुख्यादेशोक्तादिपक्षाद्येदलादि यवा मेवांशत्वात्॥१= नेति अवयवैः॥२= तत्कुंभकर्णप्रतिवचनदण्डघटितानामर्थाभावविवः। गलितांत्कुकानिर्मोकोजातोभीषणत्वरोदस्याननमुजगः॥४= पतनक्रिया [redacted] वेशेनावयवा [redacted] मांप्राधान्यविवक्षायां

१६१ मलपक्षे च सहजत्वं गम्यत इति सहजावयवो नामायमंग प्रधानरूपके ष्वर्थभूयिष्ठरूपकभेदः। नैतद्वाच्यं। त
न्मांगुलिदलश्रेणीत्यादेरर्थप्रधानभेदादिदं न भिद्यते। तत्र हि भूपालमौलिधारणक्रियासमावेशेनावय
विनः प्राधान्यं [redacted] विवक्षितमिह तु पतनक्रियायामवयवानामंतरेव [redacted] नैः स्फुरितादिविशेषणै
र्विशेष्यंते। आहार्यावयवं यथा॥ तोकुंभकर्णप्रतिवचनदण्डपरिघट्टिआमरिसघोरविसो॥ गलितंसुत्त
णिम्मोओजाओभीसणाअरोदस्सणणभुअओ॥ अत्र कुंभकर्णप्रतिवचनममर्षेस्तिकमितिदशाननपक्षे
दंडो घोरविषं निर्मोक इति भुजगपक्षेवयवास्तेषामाहार्यत्वादिदमाहार्यावयवं नाम रूपकमंग प्रधानरूपके श्री॰
ष्वर्थभूयिष्ठरूपकभेदः। अत्रापि कुंभकर्णसंबंधपारिघट्टितगलितविशेषणविशिष्टानामवयवानामेवद श्यान १६१

=आहार्यत्वादिति प्रतिवचनादीनामवयवत्वाभावादाहार्यत्वबोध्यं॥२= अवयवानां प्राधान्यावगमे हेतुमाह विशेषणविशिष्टानामिति॥१=

नभुजगभीषणतरीकरणक्रियायांप्राधान्यमवगम्यते॥उभयावयवंयथा।यस्याबीजमहंकृतिर्गुरुतरोमूलं
ममेतिग्रहोनित्यस्मृतिरंकुरःसुतसुहृत्स्वाद्यःपल्लवाः।स्कंधोदारपरिग्रहःपरिभवःपुष्पंफलंदुर्गतिःसा
मेत्वच्चरणार्हणापरशुनातत्काललूनयतां।अत्रबीजंमूलमंकुरःपुष्पफलमितिलतापक्षेसहजाः।तत्क्षा
पक्षेपुनरहंकृत्यादयःआहार्याअवयवाइतितदिदंसहजाहार्याणामवयवानांपरस्परमुपमानोपमेयभावरूप
णेनोभयावयवंनामरूपकमिदमंगप्रधानरूपकेष्वर्थभूयिष्ठरूपकभेदः।अत्रापिचाहंकारममताभ्रोम्यस्मरण
सुतादिदारपरिग्रहपराभवदुर्गतीनामवयवानामेवबीजादिरूपेणरूपितानांभगवदाराधनकुठारेणतत्काल
लूनतामितिप्रार्थनक्रियायांसमावेशेनप्राधान्यमवगम्यते॥विषमावयवंयथा।मदरेखाक्तकपोलेनमन्मथ

१६२ स्तनमुखेंदुना। नत्रि तम्भूलतेनालंमर्दितुं भुवनत्रयं॥ अत्रेंदुनामुखावयवी रूपितः कुचौ च तदवयवौ लताव
यविभ्यां मदरक्तौ तु कपोलौ न केनापीति सर्वतो वैषम्यादिषमावयवं नाम रूपकमिदं मंग प्रधानरूपके स्वर्थ
भूपिष्ट रूपकभेदः। अत्रापि मदरक्तनत्रि तयोः कपोलकुचयो रेव मन्मथस्य जगत्त्रितयमर्दनक्रियायां प्राधा
न्यं साधकतमत्वं गम्यते॥ आधारवन्निराधारं केवलं व्यतिरेकि च। इति शब्दार्थभूपिष्ठं श्रुद्दमाहुश्चतुर्विधं।ते
ष्वाधारवद्यथा। मोहइ विसुद्धकिरणो गअणसमुद्दम्मि रअणिवेलालग्गो। ताराम्ओत्तापअरो फुडं विहडिअ
मेहसिप्पिसंपुडविमुक्को॥ अत्र समुद्रत्वेन रूपितं गगनमाधारं परिकल्प्य रजनिमेघताराकौघानां वेलाम्बु
क्तिमुक्ताफलप्रकराणां च प्रतीयमानाभिधीयमानसमाहश्यानां शब्दप्राधान्यतोर्थप्राधान्यतश्च रूपणां कृत श्री० १६२

=शोभते विशुद्धकिरणो गगनसमुद्रे रजनिवेलालग्नः। तारामुक्ताप्रकरः स्फुटं विघटितमेघसंपुटविमुक्तः॥ १ = रजनिवेलालग्नः ... जगतादिसंबंध उपमेये ... उपमानभूतवेलाघोषे ...

=वनराजिकेसरहस्ताः कुसुमायुधसुरभिसंचरद्भुजपटाः। शशिकरमुहूर्तमेघास्तमःप्रतिहस्तिनो विनिर्यान्ति धूमोत्पीडाः।।१२ प्रतिहस्तिशब्दः प्रत्यीकार्थे ऽर्जितवसंक्रमितवाच्यभावेन सच्चबोधकः। प्रतिहस्ताः इति पाठः प्रतिहस्तः प्रतिनिधाविति विश्वस्तत्पाठे तो जग

मिति आधारवन्नाम रूपकमिदं शुद्धरूपकेषु शब्दार्थभूयिष्ठरूपकभेदः निराधारं यथा। वणराइकेसरह
त्थाकुसुमाउहसुरहिसंचरंतधअवडा। ससिअरमुहुत्तमेहा तमपडिहत्था विणिन्तिधूमुप्पीडा। अत्र धू
मोत्पीडानां वनराजिकेशरहस्तत्वेन कुसुमायुधसुरभिसंचारध्वजपटत्वेन शशिकरमुहूर्तमेघत्वेन तमःप्र
तिहस्तित्वेन च रूपितानां निराधाराणामेव शब्दप्राधान्यमर्थप्राधान्यं चावधार्यत इति निराधारं नाम रूपक
मिदं शुद्धरूपकेषु शब्दार्थभूयिष्ठरूपकभेदः केवलं यथा। वेल्लितभ्रूगलद्घर्मजलमालोहितेक्षणं। वि
वृणोति मदावस्थामिदं वदनपंकजं। अत्रावयविन एव केवलस्य वदनं पंकजमिवेति रूपणादस्य शब्द
प्राधान्यं वेल्लितभ्रूप्रभृतिविशेषणोपादानाच्चार्थप्राधान्यमेव लक्ष्यते तेन केवलं नाम रूपकमिदं शुद्ध

१६२ रूपकेषूभयमूपिष्ठरूपकभेदः॥ व्यतिरेकवद्यथा॥ अनाघ्रातंपुष्पंकिसलयमलूनंकररुहैरनाविद्धंरत्नं
मधुनवमनास्वादितरसं। अखण्डंपुण्यानांफलमिवचतद्रूपमनघंनजानेभोक्तारंकमिहसमुपस्थास्यति
163 विधिः। अत्रपुष्पकिसलयरत्नमधुपुण्यफलानामनाघ्रातमित्यादिविशेषणोपादितव्यतिरेकाणांप्र
तीयमानसादृश्येनशकुन्तलारूपेणारूपणादर्थतःशब्दतश्चप्राधान्यमवधार्यतइतिव्यतिरेकवन्नामरू
पकमिदंशुद्धरूपकेषूभयमूपिष्ठरूपकभेदः॥ ॥अथसंकीर्णभेदानांचतुष्टयमिहोच्यते। स्यात्सावयवसं
कीर्णंतथानवयवाह्वयं। तथैवोभयसंकीर्णंश्लेषोपहितमित्यपि। सेषांरूपकभेदानांविंशतिश्चतुरुत्त श्री
रा॥ तेषुसावयवसंकीर्णंयथा २६ अरकेसरशिवहंसोहरधवलब्रदलसहस्रपरिगअं। मकुमदंसरोजो १६२

=रविकरवकेसरनिवहंशोगतेधवलाभ्रदलसहस्त्वदलपरिगतं। मधुमद्दर्शनयोग्यंपिनामरोसन्तिपंकजमिवनभस्तलं। १=

गोपिआमहुपत्तिपंकअंबुणहअलं। अत्र पितामहोत्पत्तिपंकजमिव नभस्तलं शोभत इत्युपमानोपमेयभा
वेनावयविनोरभेदस्याविवक्षायामुपमैव न रूपकं। रविकरधवलाभ्रदलसहस्रयोः केसरनिकरदलसहस्र
योश्च प्रतीयमानाभिधीयमानसादृश्ययोः सहजाहार्यावयवभूतयोरभेदोपचारेणारूपणमिति सावयवरूपेणो
पमायाः संकीर्णत्वादिदं सावयवसंकीर्णं नाम संकीर्णरूपकेषूभयमूपिष्ठरूपकभेदः। निरवयवसंकीर्णं यथा
।दीहो दिअहभुअंगो रइबिंबफणामणिप्पहं विअसंतो। अवरसमुद्दमुवगओ मुंचन्तो कंचुअं व आअवणिव
हं॥ अत्र दिवसावयविनो भुजंगावयविनश्चाभिधीयमानप्रतीयमानदैर्घ्यदारुणादिधर्मयोरभेदोपचारेणारूपण
मवयवानां चतुर्णां रविबिंबातपफणामणिनिर्मोकानां सत्यामप्यभेदोपचारयोग्यतायां द्वयोरविशब्दप्रयोगे

=दीर्घो दिवसभुजंगो रविबिंबफणामणिप्रभां विकासयन् अपरसमुद्रमुपगतो मुंचन् कंचुकमिवातपनिवहं ३=

नोपमायांद्वयोस्तुल्यरूपेणैव्यसामानाधिकरण्यान्नावयवावयविभावो विभाव्यत इति निरवयवस्योपमायांसंकी
र्णत्वान्निरवयवसंकीर्णंनामसंकीर्णरूपकेषूभयभूयिष्ठरूपकभेदः॥उभयसंकीर्णंयथा॥धुअमेहमहुअरा
ओघणसमअआअड्ढिओणअविमुक्काओ।णहपाअवसाहाओणिअअट्ठाणंव्वपडिगआदिसाओ।अ
त्रपादपरूपेणारूपितस्यनभसोयद्देतद्दिशांशाखारूपेणारूपणंमेघानांचमधुकरप्रकरेणतदुभयमप्यन्य
पदार्थषष्ठीसमासयोरभिधीयमानेनसावयवंनिरवयवंचेतिउभयेक्षयाचसंकीर्यमाणमुभयसंकीर्णरूप
कव्यपदेशंलभते।सोयंसंकीर्णरूपकेषूभयभूयिष्ठरूपकभेदः।श्लेषोपहितंयथा।पीणपओहरलग्गंदिसा
णपवसंतजलअसमअविइण्णं।सोहग्गपढमइण्हंपव्वाअइसरसणहपअंइंदहणुं॥अत्रसरसनख

पराकारस्येंद्रधनुषउत्पन्नसादृश्यादभेदोपचारेणारूपणेयोयं स्मरसेनभस्मिपदमस्येतिव्यक्तसत्याश्लिष्टरू
पणात्तद्विशेषणप्रकारः यस्त्वशोभायाः प्रथममग्र्येचिह्नं सौभाग्यस्यच प्रथमंचिह्नं पीनपयोधरेमेघेस्तनेवाल
ग्नमित्यादिविशेषणविशेष्यभावः तेनेदंश्लेषेणोपधीयतइतिश्लेषोपहितंनामसंकीर्णरूपकेषूभयभूपिष्ठ
रूपकभेदः॥ ॥द्वयोर्यत्रोक्तिचातुर्यादौपम्यार्थोवगम्यते॥ उपमारूपकान्तत्वेसाम्यमित्यामनंतितत्र।तदानंत्ये
नभेदानांमसंख्यंतस्यतत्क्रयः। दृष्टांतोक्तिः प्रपंचोक्तिः प्रतिवस्तूक्तिरेवच। तत्रैवादेः प्रयोगेनदृष्टांतोक्तिंप्रचक्ष
ते। इवादेरप्रयोगेणप्रपंचोक्तिंमनीषिणः। वस्तुकिंचिदुपन्यस्यन्यसनात्तत्सधर्मणः। साम्यप्रतीतिरस्तीतिप्रति
वस्तूक्तिरुच्यते।। तत्रक्रियाजातिगुणद्रव्ययोगादिहेतुके। साम्यपर्वादिभेदेनदृष्टांतोक्तिर्विधीयते।। सा

१६५ क्रियायोगनिमित्तसाम्याद्दृष्टांतोक्तिः सामान्यतः पूर्वा यथा॥ स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमा
165 सनबन्धधीरः। जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्। अत्र दृष्टांतदार्ष्टांतिकयोरनावि
ष्टलिंगत्वादवश्याभिधेयत्वाच्च स्थितः इत्यादिषु न लिंगभेदकृद्दोषः। अभिधीयमानस्यानादिक्रियायोग
जनितं साम्यं समस्तमूर्त्तिमत्साधारणश्च पूर्वमेव छायादृष्टांतः सेयं क्रियायोगनिमित्तसाम्या सामान्यतः
पूर्वा नाम दृष्टांतोक्तिः साम्यभेदः। सैव क्रियागुणयोगनिमित्ता विशेषतः पूर्वा यथा। सत्रलुज्ज्योइत्र वस्तु
॥ हे समत्थ जीअलोअविसरं तपस्सावो ठाइ णविरं रवि म्मिव विहाण पडिदाविम इल्लदा सप्पुरिसे॥ अत्र जग श्री०
दुद्योतनक्रियाप्रतापगुणयोगहेतुसाम्यमसाधारणश्च सूर्यदृष्टांत इति विशेषतः क्रियागुणयोगनिमित्ते १६५

यं पूर्वानामदृष्टांतोक्तिः साम्यभेदः। गुणयोगनिमित्तसाम्यासामान्यतउत्तरायथाः। रूपंतदोजस्वितद्देववीर्यंतदे
वनैसर्गिकमुल्लतत्वम्॥ नकारणात्स्वाद्विभिदेकुमारः प्रवर्त्तितोदीपइवप्रदीपात्॥ अत्ररूपादिगुणयोग
जन्मजनितंसाम्यंसामान्यरूपश्चपश्चात्प्रदीपदृष्टांतइतिसामान्यतोगुणयोगनिमित्तेपमुक्ता। नामदृष्टां
तोक्तिः साम्यभेदः। सैवक्रियागुणद्रव्ययोगनिमित्ताविशेषतोपि यथा। अव्वोछिन्नपसरिओ अहिअंउद्धा
इफुरिअसूरछाओ। उच्छाहोसुहडाणं विसमक्खलिओमहाणईणावसोत्तो॥ अत्राव्यवच्छिन्नप्रसृतइ
तिक्रियायोगनिमित्तंस्फुरितशौर्यच्छाय इतिगुणयोगनिमित्तंस्फुरितसूर्यच्छाय इतिद्रव्ययोगनिमित्तंच
साम्यंसामान्यविशेषरूपश्चविषमस्खलितमहानदीस्रोतोदृष्टांतइतिविशेषतः क्रियादियोगनिमि

१६६ 166 त्रेयमुत्तरानामदृष्टांतोक्तिः साम्यभेदः॥ द्रव्यजातिनिमित्तसाम्यासामान्यतः पूर्वादृष्टांतोक्तिर्यथा॥ विस
वेअ्रोघपांसरित्रेो जंजं अहिलेरबहलधूमुप्पीडो। सामलइज्ज रतं तरुहिंबमहो अहो अहिस्सविद्दुमवे
दं। अत्र धूमविषयोर्विद्रुमरुधिरयोश्च द्रव्यजातियोगकृतं प्रतीयमानं श्यामलोयत इति धूमविषयद्रव्ययो
गजनितमभिधीयमानं सामान्यरूपं च साम्यं सेयं दृष्टांतस्य पूर्वमेवोपन्यासात् द्रव्यजातियोगनिमित्तसाम्यासा
मान्यतः पूर्वानामदृष्टांतोक्तिः साम्यभेदः। सैव द्रव्यायोगनिमित्तसाम्याविशेषतो यथा। संचारिणीदीपशिखे
व रात्रौ यं यं व्यतीयाय पतिंवरा सा। नरेंद्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः॥ अत्र दीपशिखादिद्र श्रीः
व्ययोगकृतं साम्यं। सामान्यविशेषरूपौ संचारिणीदीपशिखेति च राजमार्गाट्ट इति च दृष्टांतो पूर्वमेवोपन्या १६६

स्तौसेयंविशेषतोद्रव्यायोगनिमित्तसाम्यापूर्वानामदृष्टांतोक्तिःसाम्यभेदः।द्रव्यायोगनिमित्तसाम्येवसामान्यतउ
त्तरणंयथा॥उज्वलालोकंयास्निग्धालंयात्यक्तानरजते।मलीमसमुखावर्त्तिःप्रदीपशिखयायथा।अत्रद्रव्या
योगकृतंसाम्यंसामान्यरूपश्चप्रदीपःपश्चात्प्रदीपशिखावर्त्तिदृष्टांतःसेयंयथोक्तरूपोत्तरणानामदृष्टांतोक्तिः
साम्यभेदः।सैवक्रियागुणायोगनिमित्तसाम्याविशेषतोयथा॥तोताणाहअच्छाअणिच्चललोअणाशिहं
पउत्थपआवंआलेक्खपईवाणवणिअच्चंपअरचडुलत्तणंपिविअलिअं॥अत्रहतच्छायमित्यादीनामंत
र्गतगुणत्वेनक्रियाविशेषणत्वात्क्रियागुणायोगंमित्तंनिजंप्रकृतिचटुलत्वमपिविगलितमितिगुणायोगनि
मित्तंचसाम्यं।सामान्यविशेषरूपश्चालेख्यप्रदीपदृष्टांतइतिक्रियागुणायोगनिमित्तेयंविशेषतउत्तरणाना

मदृष्टांतोक्तिः साम्यभेदः ॥ अथ दृष्टांतोक्तेर्दृष्टांतालंकारस्य वा को विशेषः । उच्यते । लौकिकपरीक्षकाणां यस्मि
न्नर्थे बुद्धिसाम्यं स दृष्टांत इत्यर्थप्रतीति न कश्चिद्विशेषः । उक्तिप्रतीति पुनरनेको विद्यते । तद्यथा ॥ दृष्टांतदार्ष्टांतिक
योर्भिन्नवाक्यनिर्देशो दृष्टांतालंकारः । एकवाक्यनिर्देशो दृष्टांतोक्तिः साध्यधर्मसिद्धये दृष्टांतालंकारः । साधर्म्य
सिद्धये दृष्टांतोक्तिः । इवाद्यप्रयोगो दृष्टांतालंकारः इवादिप्रयोगे तु दृष्टांतोक्तिः । अत एवेयमुभयालंकारः स
पुनरर्थालंकार इति ॥ ॥ साम्योत्कर्षापकर्षोक्तेरुपमानोपमेययोः । प्रकृता विकृता चेति प्रपंचोक्तिः प्रदर्श्यते
। सोपमानोपमेययोः साम्येन प्रकृता यथा ॥ अरण्यबीजांजलिदानलालितास्तथा च तस्यां हरिणा विशश्वसुः
॥ यथा तदीयैर्नयनैः कुतूहलात्पुरः सखीनाममिमीत लोचने । अत्र मृगलोचनोपमानानां तल्लोचनोपमेययो

श्चसाम्यमविकृतानामेवप्रतीयतेसेयंसामान्येनप्रकृतानामप्रपंचोक्तिः साम्यभेदः॥ प्रकृतेवोपमानोत्कर्षेण
यथा। गर्वमसंबाधमिमंलोचनयुगुलेनवहसिकिंमुग्धे। संतीहशान्तिदिशिदिशिसरस्सुननुनीलनलि
नानि॥ अत्रतवद्वेलोचनेऽमलेएवसरसांपुनर्बहूनिनीलोसलानी स्फपमानोत्कर्षः प्रतीयते। सेयमु
पमानोत्कर्षेणप्रकृतानामप्रपंचोक्तिः साम्यभेदः। सैवोपमानापकर्षेणयथा। अन्यतोनयमुहूर्त्तमाननं
चंद्रएषसरलेकलामयः। माकदाचनकपोलयोर्मलंसंक्रमय्यसमतांनपिष्यति। अत्रोपमानस्यमलि
नताकृतोपकर्षः प्रकृतएवप्रतीयतेसेयमुपमानापकर्षेणप्रकृतानामप्रपंचोक्तिः साम्यभेदः। सैवोपमा
नस्यकिंचिदुत्कर्षेणयथा॥ आपातमात्ररसिकेसरसीरुहस्यकिंबीजमर्पयितुमिच्छसिवापिकायां। का

१६८
168

लःकलिर्जगदिदंनकृतंत्वमहोस्थित्वाहारिष्यतितवैवमुखस्यशोभां।अत्रोपमानस्योपमेयादौबद्दुलकर्षः
प्रकृतएवप्रतीयते।सेयमौबद्दुलकर्षेणाप्रकृतोनामप्रपंचोक्तिःसाम्यभेदः।उपमानोपमेययोःसाम्यापत्या
विकृतायथाघरिणी।अमहाणसकम्मलग्गमसिमइलिएणहत्थेण।छित्तंमुहंहसिज्जइचंदावत्थंगअं
पइणा।अत्रोत्कृष्टोपमेयस्यमषीमालिन्यवैकृतेनोपमानसाम्यमापाद्यमानंप्रतीयते।सेयमुपमानोपमे
ययोःसाम्यापत्याविकृतानामप्रपंचोक्तिःसाम्यभेदः।विकृतैवोपमेयस्योत्कर्षापत्यायथा॥रत्तुप्पलदल
सोहातीअविचसत्थम्मिहुरहिवाहणीभरणामअंतवेहिमणाहरापडिमावडिएहिलोअणेहिंलहु श्री०
इआ।अत्रोपमेयस्यमधमदाताम्रत्वकृतउत्कर्षःप्रतीयते।सेयमुपमेयोत्कर्षेणविकृतानामप्रपंचो १६८

क्तिः साम्यभेदः। सैवोपमेयापकर्षापस्या यथा॥ मृगं मृगांकः सकलं सदांके बिभर्त्ति तस्यास्तमुखं कदाचित्। कपो
लदेशे मृगनाभिपत्त्रमिषान्न खेन तस्येतोपकर्षः। अत्र मृगांकः सकलं मृगं सदा बिभर्त्ति। तन्मुखं च कदाचिन्मृग
नाभिमात्रजमेव पत्त्रमित्युपमेयस्य वाचनिकापकर्षापत्तिः प्रतीयते। सेयमुपमेयापकर्षापस्याविकृता नाम प्रपं
चोक्तिः साम्यभेदः। सैवोपमेयस्य साम्यापस्योपमानोत्कर्षेण च यथा नमर्त्यलोकस्त्रिदिवात्प्रहीयते म्रियेत नाये
यदि वल्लभो जनः। निवृत्तमेव त्रिदिवप्रयोजनं मृतः स चेज्जीवन एव जीवति। अत्रोपमेयस्य पथ्योक्तधर्मयोगे सत्युप
मानेन पूर्वार्द्धे साम्यमुत्तरार्द्धे तु किंचिदुत्कर्षो भवति। सेयं पथ्योक्ता विकृता नाम प्रपंचोक्तिः साम्यभेदः॥ प्रतिवस्तू
क्तिरप्यस्मिन्न्जीवका च कथ्यते। दृष्टांतोक्तेश्च सा छायां प्रपंचोक्तेश्च गाहते। सा दृष्टांतोक्तिछायया विधा दृजुः

१६९ पूर्वाचयथा। तन्मन्ये हिमभासस्तारानिकरेण कांतिरुच्छेद्या। यत्रस्यामुखमेतद्यदि युवतिमुखानि विजयंते। अत्र
169 तदिंदोस्तारकौघेण कांतिरुच्छेद्या इति पूर्वमृजूक्त्या दृष्टांतरूपं। पश्चाद्यदेतन्मुखं युवतिमुखानि विजयंत इति क्र-
जूक्त्यैव दार्ष्टांतिकरूपं प्रतिवस्तूपन्यस्तमिति सेयं दृष्टांतोक्तिच्छायया विधा द्वन्द्वी पूर्वा च प्रतिवस्तूक्तिः साम्या-
भेदः। सैवोत्तरा वक्रा च यथा। सुदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य। दूरीकृताः खलु गुणैरुद्यानल-
तावनलताभिः। अत्र सुदुर्लभमिति वक्रोक्त्या एवं दार्ष्टांतिकरूपं वस्तूपन्यस्य पश्चाद्दूरीकृताः खलु गु-
णैरिति वक्रोक्त्यैव दृष्टांतरूपं प्रतिवस्तूपन्यस्तमिति सेयं दृष्टांतोक्तिच्छायया विधोवक्रोत्तरा च प्रतिवस्तूक्तिः १६९
साम्यभेदाः। दृष्टांतोक्तिच्छायया निबंधेनु। पूर्वा च यथा। नमालतीदामविमर्दयोग्यं न प्रेम नव्यं सहते पराधीनं॥

म्लानापि न म्लायति केसरस्रग्देवी न खंडप्रणया कथंचित्। अत्र न मालती दामविमर्दयोग्यमिति म्लानापि न म्लाय
ति केसरस्रगिति च वक्रजूक्तिभ्यामेव पूर्ववद्दृष्टांतरूपे वस्तुनी प्रतिषिध्योत्तरकालं न प्रेमनव्यं सहते पराधीनिति दे
वी न खंडप्रणया कथंचिदिति च वक्रजूक्तिभ्यामेव पूर्ववद्दृष्टांतरूपे वस्तुनी प्रतिषिध्योत्तरकालं न प्रेम नव्यं सहते
पराधीनिति देवी न खंडप्रणया कथंचिदिति च दार्ष्टांतिकरूपे प्रतिवस्तुनी ऋजूक्त्यैव प्रतिषिद्धे सेयं निषेध
ऋज्वी पूर्वा च दृष्टांतोक्तिच्छायया प्रतिवस्तूक्तिः साम्यभिदः। सैवोत्तरा च वक्रा च यथा। मानुषीषु कथं वा स्या
दस्य रूपस्य संभवः। न प्रभातरलं ज्योतिरुदेति वसुधातलात्। अत्र कथं वा स्यादिति वक्रया निषेधोक्त्या दार्ष्टां
तिकमभिधाय पश्चाद्वसुधातलात्प्रभातरलं ज्योतिरुदेतीति वैयधिकरण्यवक्रयैव निषेधोक्त्या दृष्टांतोऽभि

८० हितः सेयं निषेधे वक्रोक्तिराचष्टे दृष्टांतोक्तिच्छाया यथा प्रतिवस्तूक्तिः साम्यभेदः । प्रपंचोक्तिच्छाया यथा विधा दृष्टी यथा । त
रंगय दृशो गमि पततु चित्रमिंदीवरं स्फुटी कुरु रदच्छदं व्रजतु विद्रुमः श्वेततां ॥ क्षणं वपुरयाद्दृशा स्पृश तु कांचनं का
170 लिकामुदं च यमुनं वमनाभवनु चाहि चंद्रं नभः । अत्र प्रथमे च चतुर्थ पादयो रुपमानोपमेय साम्यं वैकृतं । द्विती
य तृतीय पादयो रुपमानापकर्षः प्रकृत इति सेयं प्रपंचोक्तिच्छाया यथा विधा दृष्टी नाम प्रतिवस्तूक्तिः साम्यभेदः । से
व विधो वक्का यथा । एक्को एा मि अ मुअ भंग विमलकवोलं गवअ एां गतु स्स मअ हिं निरिक्ख एा अ एां ग । सुहुस
सिविंब उकलंक गारउ पंडरउ किव त्त उउ प्पो एा भमा इ अ एा मं छ एा ख प्प रउ ॥ अत्रोपमेयोत्कर्षो विकृतः ८०
उपमानापकर्षः प्राकृतः प्रकाशत एव यापुनरियमुत्तरार्द्धे नरूपके णोपमानापकर्षस्योक्तिभंगिस्तयेयं प्र

पंचोक्तिच्छाययाविधौवक्रानामप्रतिवस्तूक्तिःसाम्यभेदः।सैवनिषेधेऋज्वीयथा।दातारोयदिकल्पशाखिभिरलं
यद्यर्थिनःकिंतृणैःसंतश्चेदमृतेनकिंयदिखलास्तत्कालकूटेनकिं।किंकर्पूरशलाकयायदिदृशोःपंथानमे
तिप्रियासंसारेपिसतींद्रजालमपरंयद्यस्तितेनापिकिं।अत्रोपमेयोत्कर्षःऋजूक्तेर्वचनिबद्धइतिसेयंप्रपंचोक्ति
च्छाययानिषेधेऋजुर्नामप्रतिवस्तूक्तिःसाम्यभेदः।सैवनिषिद्धेवक्रायथा।तद्वक्त्रंयदिमुद्रिताशशिकथातच्चेत्स्मि
तंकासुधातच्चक्षुर्यदिहारितंकुवलयैस्तच्चेद्गिरोधिङ्मधु।धिक्कंदर्पधनुर्भ्रुवौचयदितेकिंवाबहुब्रूमहेतत्स
त्यंपुनरुक्तवस्तुविरसःसर्गक्रमोवेधसः।अत्रोपमानापकर्षोवक्रोक्त्याचनिषेधःशेषंपूर्ववत्।तेनमेद्वेअ
पिमालोपमाच्छाययाप्रपंचोक्तीपूर्वेपुनरुत्साद्योपमाच्छायेतिमंतव्यं॥ ॥अर्थयोरतिसादृश्याद्यत्रदोला

१७१ यतेमनः। तमेकानेकविषयं कवयः संशयं विदुः। तत्रैकविषयो नेकोयस्मिन्नेकत्र शंक्यते। यस्मिन्नेकमनेकत्र सोने
171 कविषयः स्मृतः। तयोराद्यो ऽभिधीयमानसादृश्यो यथा। आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा नासाग्रे न
यनं यदेतदपरं यच्चैकतानं मनः। मौनं चेदमिदं च शून्यमखिलं यद्विश्वमाभाति ते तद्ब्रूयाः सखि योगिनी किमसि
भोः किं वा वियोगिन्यसि। अत्रैकस्मिन्वस्तुनि वस्तुद्वयस्याभिधीयमानसामान्यप्रत्यक्षं तद्विशेषप्रत्यक्षादु
भयविशेषस्मरणाच्चयो विमर्षः सोयमेकविषयः संशयः। स एव प्रतीयमानसादृश्यो यथा। किं पद्ममन्तर्भ्रान्तालि
किं ते लोलेक्षणं मुखं। मम दोलायते चित्तं पश्यतस्त्वां घनस्तनि। अत्र मुखलक्षणो लोचनलक्षणो चैकस्मिन्नेव १७१
वस्तुनि पद्मलक्षणं भ्रमरलक्षणं चापरमपि वस्तु प्रतीयमानसादृश्यमाशंक्यते। सोयमप्येकविषय एव संशयः

।अनेकवस्तुविषयो द्विधा। शुद्धो मिश्रश्च। तयोः प्रतीयमानसादृश्यः शुद्धो यथा। बालीमंमुहम्मोलीउल्हसिअ
णिअंसिणीगहणसुणिअविणिघंतना। स्विहाएमेंमलीराकुविती अमुद्धजोहरमुणजोहरगअणुमुल्लले
ओणाहुआणाइंदोराहविचंदुकअणु। अत्र द्वयोः प्रतीयमानसादृश्ययोः बालिकामुखचंद्रयोरेकस्यैव वि
शंकान्तरतिसोयमनेकविषयः शुद्धः संशयः। अभिधीयमानसादृश्यो मिश्रो यथा। द्वावप्येतावभिनवजपापु
ष्पभासांनिवासौ तिष्ठत्येतद्द्वयमपि वियन्मंडलस्योपसंध्यं। अस्तं कोयात्युदयति च कः कोरविः कः शशां
कः का च प्राची तदिह नवयं काप्रतीचीति विघ्नः। अत्र द्वयोरभिधीयमानसादृश्ययोः सूर्याचंद्रमसोः प्राची
प्रतीच्योर्वा तदन्यतममेकमेव वस्तु पर्यायतो विशंक्यत इति अनेकविषयोयं मिश्रः संशयः। उपलक्षणं चैत

१२२ त्रेन वितर्को न्यायादयो ऽपि संशयोक्तावेव द्रष्टव्याः। तद्यथा सरोजपत्रे परिलीनषट्पदे विशालदृष्टेः स्विदमू विलोचने
172 शिरोरुहाः स्विन्नतपक्ष्मसंततेर्द्विरेफवृन्दं नु निशब्दनिश्चलं॥ ॥ अगूढहासस्फुटदन्तकेसरं मुखं स्विदेतद्विक
चं नु पंकजं। इति प्रलीनां नलिनीवने सखीं विदांबभूवुः सुचिरेण योषितः॥ यथा च। नुहे मत्त्र खलिउ
ल्लावेण्हा णोल्लएचिउरे विणिणिग्गंअसरणासारे सम्मोत्तिअहारे उरे॥ कालत्तरेतेरलछिकुमअंगणु समुल सइ मा
हङ्कपुणु थणगुडुरेणामुणइ कहिं वसइ॥ कः पुनर्वितर्कसंशययोर्विशेषः। उच्यते। निर्णयासंस्नो वितर्कः वितर्को
स्नश्च संशयः संशयानो हि वितर्कस्य कोटिमारुह्य ततो विभ्रष्टस्तत्स्वमभिनिविशते। यथा पूर्ववाक्ये विदांबभूवु १२२
रिति संशयमेव विगाहते यथा माहङ्कपुणुथणगुडुरेणामुणइकहिंवसइ। शब्दाश्च किं स्विदादयस्तुल्यरूपा

एवंसंशयविपर्ययपोरिति दुरवबोधस्ताद्दृशोषः। नन्वेवं वितर्कोदयोऽप्युभयालंकारास्तुः। सत्यं। किंतूक्तिपक्षेपरार्थाद्
मानवत्स्वरूपपक्षे स्वार्थानुमानवदिति। अयमेव चोक्तिशब्दस्यार्थः तेन स्वरूपमात्रोक्तौ संशयवितर्कोदयेऽप्य
र्थालंकारः उक्तिप्राधान्ये तूभयालंकाराः॥ ४॥ अप्रकृतिरपेकृत्य किंचिदन्यार्थदर्शनम्। औपम्यवत्स्येनोप
म्या चेति सादृश्यविधोच्यते। वाच्ये प्रतीयमाने च सादृश्ये प्रथमातयोः। तथाभूते द्वितीया स्यादप्रकृतो नव्यवस्कृति
। अनौपम्यवती भूयः पूर्वापूर्वा चिकथ्यते। तासामुदाहृतिष्वेव रूपमाविर्भविष्यति। तत्राभिधीयमानौपम्यव
ती यथा। गिम्हे दवग्गिमसिमइलिआइं दीसंति विंझसिहराइं। आसासु पउत्थवइए ण होन्ति णववाउसंभा
इं। अत्र नवप्रावृडभ्राणां विंध्यशिखरैरभिधीयमानसादृश्यैरप्रकृतत्वादभिधीयमानौपम्यवस्यप्रकृतिः। प्र

१७३ 173 तीयमानौपम्यवती यथा। नकेतकीनां विलसंति सूचयः प्रवासिनो हंत हसत्ययं विधिः॥ तडिल्लतेयं न चकास्ति चंच
ला पुरः स्मरज्योतिरिदं विजृंभते। अत्र केतकीसूचीनां विधिविहसितैः प्रतीयमानस्सादृश्ये तडिल्लतायाश्च स्म
रज्योतिषोऽपह्नुतत्वादियं प्रतीयमानौपम्यवत्यपह्नुतिः। अनौपम्याभिधीयमानापह्नोतव्यवस्तुः पूर्वा यथा। रा
जकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः। अवगच्छेयुराः ज्ञातमहो शीतानिलं वनं। अत्र राजकन्यानुरागलक्षणस्य
रोमांचकारणस्य रक्षकावगतिहेतोः पूर्वमेवाभिहितस्यचववनानिलशैत्यलक्षणेन कारणांतरेणापह्नवः। न
चैतयोः सादृश्यमस्ति। सेयमनौपम्याभिधीयमानोऽपह्नोतव्यवस्तुः कार्यात्पूर्वं कारणोपन्यासेन पूर्वैत्युच्य श्री०
ते। सैवापूर्वा यथा। आमंदाक्षप्रवृत्तमेकथं दृष्टैव कन्यकां। अक्षिमे पुष्परजसा वातोद्धूतेन पूरितं। अत्रानंदा १७३

क्रमवत्त्वमिति पूर्वं कार्यस्य पश्चाद्दृष्टैव कन्यकामिति कारणस्योपन्यासः। शेषं पूर्ववत्। सेयमभिधीयमाना
ऽपह्नोतव्यवस्त्वनौपम्यादपह्नुतिरपूर्वेत्युच्यते। अनौपम्येव प्रतीयमानापह्नोतव्यवस्तुः पूर्वा यथा। उप्पे
ह्लिअवइ कारिल्लआइं उच्चेसि दस्सवछलिए। कंटच्चिअ विलिहितपीणुसच्चअणाउ तम्मसुएन्नाहे। अ
त्र चैतस्याः स्तनयोर्नृपपतिनाननखक्षतं कृतमपि तु कंटकैरिति प्रतीयमानापह्नोतव्यं वस्तु प्रकाशते पू
र्ववदेव च पूर्वार्द्धे कारणस्योपन्यासः पश्चिमार्द्धे तु कार्योपदेशो दृश्यते। सेयमनौपम्या प्रतीयमानाऽपह्नो
तव्यवस्तुः पूर्वा नामापह्नुतिरपह्नुत्य किंचिदन्यार्थदर्शनमिति लक्षणयोगाज्जायते। सैवापूर्वा यथा। कस्स
वणाहो रणसो दट्ठ न पिच्छाइ सव्वणंअहरं। सभमरपउमग्घाइणि वारिअवामे सहस्सु एन्हिं। अत्रापि नास्यात

पपत्तिनाऽत्र धरोऽव्रणितः किं तर्हि भ्रमरेणेति प्रतीयमानार्थः प्रक्रान्तव्यं वस्त्र । पूर्वार्द्धे तु सव्रणमधरमिति कार्यमुप
न्यस्यपश्चिमार्द्धे सभ्रमरकमलाघ्रायिणीति कारणमुपन्यस्तं । सेयमन्योऽयमप्रतीयमाना प्रक्रान्तव्यवस्का रे
पूर्वाचार्यैरुक्तलक्षणायोगाज्ज्ञायते ॥ ४ ॥ समाधिमन्यधर्माणामन्यत्रारोपणां विदुः । निरुद्भेदोऽथसोद्भेदः स
द्विधापरिपठ्यते । तयोर्निरुद्भेदो यथा ॥ हरेपरिद्दूराए अववकहत्तस्मि दिणअ्मे अवरेदिसां असह त्तिघकिलि
म्मइ पिअ्ममपच्चक्खवहूसणं दिणलच्छी । अत्र दिनकरदिनलक्ष्मीप्रतीचीनां समारोपितनायकनायिकाप्रतिनायि
काधर्माणां हरप्रतिबद्धएगइत्यादिभिः श्लिष्टपदैरनुद्भेद एव मन्यधर्माध्यारोपादयं निरुद्भेदः समाधिभेदः । सोद्भे
दो यथा वल्लहेलडुबोलंतइएव्वइसुणुबहुवलिकिज्जमितामरसणितुस्सरोसहुथिरकुजेणाणिरग्गलुजं

पइ किंपिणि जावजणुतावढिमेणविसिन्निस्सत्थियधुलुइतंसु।अत्रापिप्रियतमव्यलीकासहिह्लुः कापिका
मिनीहिमानीपुष्टांकमलिनीमालोकतस्यामात्मधर्मानिष्येचस्तर्यधर्म्मानारोपयति।मेचबलिः क्रियेऽहं
तवरोषसेत्यादिभिः पदैरुद्धिद्यमानाद्दहस्रतीयंतरल्पयंसोद्भेदः समाधिभेदः।अन्यस्यान्यधर्मश्चान्यधर्मा
इतिव्युत्पत्त्याधर्मिणोध्यासेसमाधिरिष्यते।साधर्माणांधर्मिणश्चयथा।चंद्रज्योत्स्नाविशदपुलिनेसैक
तेस्मिन्सरय्वावादद्यूतंसुचिरमभवत्सिद्धयूनोः कयोः श्चित्।एकोब्रूतेप्रथमनिहतंकेशिनंकंसमन्यः स
त्वंतत्त्वंकथयंभवनाकोहतस्तत्रपूर्वः।अत्रसंबोध्यवर्णनीयेविभुस्वरूपस्यधर्मिणस्तदुमीणांचाध्या
सादयंधर्मिधर्माध्यासरूपः समाधिः।धर्मिणएवाध्यासोयथा।प्रोमश्रीरिवकस्मात्पुनरपिमपितंमंथखे

१७५
176

दंविदध्यान्निद्रामप्यस्य सर्वामनलसमनसो नैव संभावयामि सेतुंबध्नाति कस्मात्तु नरयमखिलद्वीपता
थानुपातस्त्वय्यायाते वितर्कानिति निद्धतदृशा भातिकंपः पयोधेः। अत्र ग्रामश्रीरेषकस्मादित्यादिभिर्मन्थ
खेदादिधर्माणां निवर्तितत्वात् ग्रामश्रीरित्यादीनां च श्लेषेणैवाभिधानात्त्वयीति वर्णनीयपदे विष्णुस्वरूपस्य
धर्मिण एवाध्यासात्त्रैष्टुभीणां चानध्यासादयं धर्म्यध्यासरूपः समाधिः॥ समाधिमेवमन्यं ठेमेलितं तदपि
द्विधा धर्माणामेव चाध्यासे धर्मिणां वान्यवस्तुनि। तत्रान्यधर्माणामेवान्यवस्तुन्यध्यासान्मेलितं यथा। प
ल्लविअं विअ करपल्लवेहिं पप्फुल्लिअं विअ णअणेहिं। फलिअं विअ पीणपओहरेहिं अस्साए लाव श्री०
ण्णं। अत्र पल्लवितमिव पुष्पितमिव फलितमिवेत्युत्प्रेक्षया लताधर्माणां लावण्यधर्मिणि धर्माध्यारोपो द १७५

स्यते।करपल्लवादीनांचानुपात्तव्यापारहेतुत्वेनसाधकतमत्वेनवाप्राधान्यंलक्ष्यते।सोयमन्यवस्तुनिपुनर
न्यधर्मारोपणामेवारोपेणामेलितंनामसमाधिभेदोभवति।सतूद्देशेसमाध्युक्तिरित्यक्रियग्रहणाल्लभ्यते।धर्मा
णांधर्मिणश्चयथा।देहोव्वपडइदिअहोकंठच्छेओव्वलोहिआहोइरई।गलइरुहिरंवसंझाघोलइके
सकसणंसिरंमिअतिमिरं।अत्रदेहादयोयथाक्रमंक्रियावंतोजंतुवधक्रियायांनिबद्धाःदिवसादिभि
रुपमेयाःदिवसावसानक्रियायांमेलितास्तदेतद्गुणक्रियावतांद्रव्याणांप्रधानक्रियाध्यारोपेधर्मिधर्मा
ध्यासेमेलितंनामसमाधेरेवभेदोभवति॥६॥यत्रोपमानादेवैतदुपमेयंप्रतीयते।अतिप्रसिद्धेस्तामाहुःस
मासोक्तिंमनीषिणः।प्रतीयमानेवाच्येवासादृश्यंसोपजायते।श्लाघ्यांगाहिमुभनोमेतदुपाधीन्नचक्ष

७६ ते। विशेष्यमात्रभिन्नापि तुल्याकारविशेषणा। अस्त्वसावपराप्यस्ति तुल्यातुल्यविशेषणा। संक्षेपेणोच्य
176 तेयस्मात्समासोक्तिरियं ततः। सैवान्योक्तिरन्योक्तिरुभयोक्तिश्च कथ्यते। तत्रौपमानसादृश्याश्लाघा
वतीयथा॥ उत्तुंगेक्षतसंश्रयस्य शिखरिणापुच्चावचग्रावणि न्यग्रोधस्य किमंगतस्य वचसाम्श्लाघास्तुपर्याप्यते
।बंधकर्वीमपुराहृतः किमथवा सत्कर्मणां संचयो मार्गे रूक्षविपत्रशाखिनि जनोयं प्राप्य विश्राम्यति। अत्र
न्यग्रोधेनैवोपमानेनोपमीयमानेन प्रतीयमानसादृश्यस्य वर्णनीयवदान्योपमेयस्योक्तत्वात्। तच्छ्लाघ
यैव तच्छ्लाघा प्रतीयते इति सेयं प्रतीयमानसादृश्याश्लाघावती समासोक्तिः। सैव गर्हावती यथा॥ किं जातो श्री०
सि चतुःपथे यदि घनच्छायोसि किं छायया संपन्नः फलितोसि किं यदि फलैः पूर्णोसि किं संन्नतः। हे सद्वृ १७६

स्मसहस्वसंप्रतिशिखाशाखाशताकर्षणक्षोभोन्मोटनभंजनानि जनतः स्वैरेव दुःश्चेष्टितैः॥ अत्रोपमा
नभूतस्य सदृक्षस्य व्याजगर्हणया तदुपमेयः कोपि सत्पुरुषो विगर्हित इति सेयं प्रतीयमानसादृश्या गर्हा
वती नाम समासोक्तिः। सैवोभयवती यथा॥ निःकंदामरविंदिनी स्थपुटितोद्देशां स्थलीं पल्वले जंबाला
विलमंबु कर्तुमपरास्ते वराहीसुतान॥ दंष्ट्राग्रं चतुरर्णवोर्मिपटलैराप्लाविताया मियं यस्यैव शिशोः स्थि
ताधिपतिर्भूः साप्युत्रिणी पोत्रिणी॥ अत्र पूर्वार्द्धे गर्हा उत्तरार्द्धे श्लाघा गम्यते। सेयं प्रतीयमानसादृश्योभय
वती समासोक्तिः। अनुभयवती यथा॥ इतः स्वपिति केशवः कुलमितस्तदीयद्विषामितश्च शरणार्थिनः शि
खरिपक्षिणः शेरते। इतोपि वडवानलः सह समस्तसंवर्त्तकैरहो विततमूर्जितं भरसहं च सिंधोर्वपुः॥ अत्र

८७ गर्हाश्लाघावाविस्मयोक्त्वावेवास्तमयते। सेयं प्रतीयमानसादृश्यानुभयवती नाम समासोक्तिः। अभिधीयमा
177 नसादृश्याश्लाघावती तुल्याकारविशेषणा यथा। नालस्य प्रसरो जलेष्वपि कृतावासस्य कोषे रुचिर्दण्डे क
र्कशता मुखे च मृदुता मित्रे महानाग्रहः। आमूलं गुणसंग्रहव्यसनिता द्वेषश्च दोषाकरे यस्यैषा स्थिति
रंबुजस्य वसतिर्युक्तैव तत्र श्रियः। अत्राम्बुरुहसत्पुरुषयोः परस्परमुपमानोपमेयभावस्यानिशयप्रसिद्धे
रुपमानेनैव श्लेषवत्तुल्यविशेषणपदाभिधीयमानसादृश्यमुपमानमेवावगम्यते। सेयमभिधीयमानसा
दृश्याश्लाघावती तुल्यविशेषणा नाम समासोक्तिः। प्रतीयमानाभिधीयमानसादृश्याश्लाघागर्हावती तुल्या ८०
तुल्यविशेषणा यथा। उपाध्वांतत्यांथाः पुनरपि सरोमार्गतिलकं यदासाद्य स्वच्छं विलसथ विलीनं क्रमभरः

।इतस्कसात्स्वेर्जरठकमठक्षिप्तपयसो निवृत्तिः कल्याणी न पुनरवतारः कथमपि। अत्र पूर्वार्द्धे अभिधीयमा
नसादृश्ययोः श्लाघा पश्चिमार्द्धे तु प्रतीयमानसादृश्ययोर्गर्हावगम्यते। सेयमुभयवती तुल्यविशेषणाभिधीयमा
नप्रतीयमानसादृश्या समासोक्तिः। अन्योक्तिर्द्विधा स्वजातौ जात्यंतरे च। तयोः स्वजातौ यथा। लक्ष्मीपयोधरो
त्संगकुंकुमारुणितो हरेः। बलिरेष स येनास्य भिक्षापात्रीकृतः करः। अत्र हरिशब्देन बलिशब्देन वा कश्चि
त्समानेतिवृत्तः पुंविशेष एवोच्यते। सेयं स्वजातिविषयान्योक्तिः संक्षेपोक्तिरूपत्वात्समासोक्तिरेव। जात्यंत
रे यथा। पिबन्मधु यथाकामं भ्रमरः फुल्लपंकजे। अप्यसन्नद्धसौरभ्यं पश्य चुंबति कुड्मलं। अत्र भ्रमरश
ब्देन कश्चित्कामी फुल्लपंकजशब्देन कापि प्रौढांगना। कुड्मलशब्देन कापि मुग्धांगनाभिधीयते। सेय

१७८ मन्यजातिविषयान्योक्तिः समासोक्तिरेव भवति। अतन्योक्तिशब्देनेहाध्यास्तविषयातद्भावापत्तिरुच्यते। पद्येष
178 ब्रह्मदत्तइति। साद्विधा। शुद्धा चित्रा च। तयोः शुद्धा यथा। सुधाबद्धग्रासैरुपवनचकोरैरनुसृतः किरन्ज्योत्स्नाम
च्छां नवलवलिपाकप्रणयिनीं। उपप्राकाराग्रं प्रहिणु नयनैस्तर्कय मनागनाकाशे कोयं गलितहरिणः शीतकिरणः
। अत्र कस्याश्चित्सुखे चंद्रमसमध्यासस्य काश्चिदेवं ब्रूते। सा चेयं पूर्वार्द्धे अभिधीयमान तुल्यविशेषणा। पश्चिमार्द्धे
पुनरनाकाशे कोयं गलितहरिणः इत्यसत्रां तुल्यविशेषणा समासोक्तिरेवानन्योक्तिः। एकस्यैव चाभ्यासादियं शुद्धे
त्युच्यते। चित्रा यथा। कमले मनागमसि कमले च कुवलये तानि कनकलतिकायां। सा च सुकुमार सुभगेत्युत्पा १७८
तपरंपरा केयं। अत्राध्यासः पूर्ववद्वैचित्र्यं च निगदेनैव व्याख्यातं। सेयमन्योक्तिः समासोक्तिरेवानेकाध्यासवै

चित्र्याच्चित्रे सुते। उभयोक्तिर्यथा। लावण्यसिंधुरपरैव हि केयमत्र यत्रोत्पलानि शशिना सह संप्लवंते। उ
न्मज्जति द्विरदकुंभतटी च यत्र यत्रापरे कदलिकांडमृणालदंडाः। अत्रापूर्वेयं लावण्यसिंधुरित्यन्योक्तिः
यत्रोत्पलानि शशिना सह संप्लवंत इत्यनन्योक्तिः सेयमुभययोगादुभयोक्तिरपदिश्यते। उपलक्षणं चैत
त् तेनान्यापि योपमानोपमेयविषये संक्षेपोक्तिः सापि समासोक्तिरेव भवति। यथा। इंदुर्लिप्त इवांजने
न जडिता दृष्टिर्मृगीणामिव प्रम्लानारुणिमेव विद्रुमलता श्यामेव हेमप्रभा। पारुष्यं कलया च कोकिल
वधूकंठेष्विव प्रस्तुतं सीतायाः पुरतश्च हंत शिखिनां बर्हाः सगर्हा इव। अत्र संक्षेपतः सीताशब्दवाच्यस्य
मुखादेरवयवसमूहस्याश्रयतः इंदुरंजनेनेव लिप्तो जडितेव मृगीणां दृष्टिः प्रम्लानमिवारुण्यं विद्रुम

१७९ 179 स्पश्यामिवहेमकांतिः। परुषाइवकौकिलालापाःसगर्हाइवशिखिनांवर्हाइत्युत्प्रेक्षोक्तेरनुक्तान्यपितदुप
मेयानिमुखादीनिप्रतीयंते। सेयमपिसंक्षेपोक्तिःसमासोक्तिरेवभवति।। केःपुनःसमासोक्तेःसमाध्युक्तेर्वि
शेषः। उच्यते। यत्रप्राकरणिकेऽप्राकरणिकोधर्मोऽध्यास्यतेसासमाध्युक्तिर्यथा। असहंनिद्यकिलिम्नदु
पिस्त्रअमपञ्चकवहूसर्णदिणलक्ष्मी० इति। यत्रपुनरप्राकरणिकेप्राकरणिकधर्मःसासमासोक्तिर्यथा।
पिबन्मधुयथाकामंभ्रमरःफुल्लपंकजे इति। ननुधर्मिणोध्यासेसमानमितिचेतन्न। सत्त्वंतत्त्वंकथयभ
वताकोहतस्तत्रपूर्वमित्यादिषुअनाकाशिकोयंगलितहरिणःशीतकिरणइत्यादिषुचप्रव्यक्तएवा
ध्यासविशेषोदृश्यते। एकत्रमनसान्यत्रतुवचसेति। सोयंसमाध्युक्तेःसमासोक्तेश्चभेदोभवति।।७।। १७९

अन्यथावस्थितंवस्तुयस्यामुत्प्रेक्ष्यतेन्यथा द्रव्यंगुणःक्रियावापितामुत्प्रेक्षांप्रचक्षते।मासद्द्रव्योत्प्रे
क्षायथा।देहस्यादर्पणेयस्यपश्यतिप्रतिमामुधा।अन्याह्रीइमिवोत्पन्नमईनारीश्वरांतरं।अत्रप्रति
बिंबरूपेणोत्प्रेक्षणंसेयमुत्प्रेक्षाद्रव्योत्प्रेक्षेतिभवति।गुणोत्प्रेक्षायथा।पल्लविअंविअकरपल्लवेहिं
पप्फुल्लिअंवणअणेहिं।फलिअंविअपीणपओहरेहिंअज्जाइलावण्णं।अत्रकरपल्लवादिरूपे
णान्यथावस्थितस्यांगलावण्यलक्षणस्यपदेनतत्पल्लवितत्वादिरूपेणान्यथोत्प्रेक्षणम्।सेयमुत्प्रेक्षा
गुणोत्प्रेक्षेतिभवति।क्रियोत्प्रेक्षायथा।सेनागजाः स्वकरपल्लवहेलिनीभिर्गंडस्थलान्मदमर्षं।मुद्ग
राददानाः।मन्येनरेंद्रतवतोयधितीरतालीपत्रादरेषुविजयस्यकृतिमालिखंति।अत्रसेनागजानांगंड

१८० 180 स्थलेभ्योलेखन्याकारैः कैर्मषीरूपस्यमदपयसोयदादानं। पश्चात्स्यतीरतालीपत्रोदरेषुमहावर्णतयानिःक्षे
पः सउक्तरूपेणान्यथोत्प्रेक्ष्यतइतिसेयमुत्प्रेक्षाक्रियोत्प्रेक्षाभवति। उत्प्रेक्षावयवोयश्चयाचोत्प्रेक्षोपमामता। प्र
तीतेचेतिनभिद्यंतेतेनानुत्प्रेक्षास्वरूपतः। तत्रोत्प्रेक्षावयवोयथा। अंगुलीभिरिवकेशसंचयंसंनिगृह्यतिमिरंम
रीचिभिः। कुड्मलीकृतसरोजलोचनंचुंबतीवरजनीमुखंशशी। अत्रांगुलीभिःकेशेषुगृहीत्वाप्रियामुखंचुंब्य
तेसाचलोचनेनिमीलयतीतिप्रायोवादः। तत्रमुखचुंबनादिक्रियाप्रधानमंगीभूताप्रतीयते। केशग्रहणा
क्षिनिमीलनेनचांगभूतेप्रधानेतत्रांगीभूतायाःक्रियायाउत्प्रेक्षणेनावयवभूताक्रियोत्प्रेक्षिताभवति। य
थाहि। कुड्मलीकृतसरोजलोचनामित्यत्रनोत्प्रेक्षापदमेवमंगुलीमरीचिभिस्तिमिरकेशसंचयंनिगृह्येत्स १८०

त्रापि तं लप्राप्नोति मरीच्यंगुलिसंनिगृहीततिमिरकेशसंचयमित्येवं वा वक्तव्यं भवति। तत्र योयमवयवक्रियाया
मप्यन्यपदार्थोक्तिरिति यावयवक्रियाविलक्षणैव प्रयोगेण पृथक्पदतया वाक्यकल्पः स एवास्यापि व्याख्या
नपरत्वेनाप्यनुयोज्यमानः कविभिरुत्प्रेक्षावयवस्तूच्यते। अन्ये पुनर्यत्र प्रधानक्रियानोत्प्रेक्ष्यते अवयव
क्रियातूत्प्रेक्ष्यते तमुत्प्रेक्षावयवं वर्णयंति यथा। लीनेव प्रतिबिंबितेव लिखितेवोत्कीर्णरूपेव च प्रत्युप्तेव
च वज्रलेपघटितेवांतर्निखातेव च। सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पंचभिश्चिंतासंततितंतुजा
लनिबिडस्यूतेव लग्ना प्रिया। तेषां मते पूर्वोदाहरणमुत्प्रेक्षावयवो न भवति। उत्प्रेक्षोपमा यथा। किंशुकव्यप
देशेन तरुमारुह्य सर्वतः। दग्धादग्धमरण्यान्याः पश्यतीव विभावसुः॥ अत्र व्यपदेशशब्देन किंशुकक

१८१ स्तुमानामग्निसादृश्यमभिधाय दर्शनक्रियोत्प्रेक्षितइति सेयमुत्प्रेक्षोपमा पूर्वस्मिन्नप्युदाहरणे मरीचि
181 भिरंगुलिभिरिव निभिरं केशसंचयमिव संनिगृह्येत्युपमानार्थानुप्रवेशउत्प्रेक्षायां दृष्टव्यः। सेयमुत्प्रे
क्षावयवउत्प्रेक्षोपमाचोत्प्रेक्षैव भवति। मतं यथा। यदेतच्चंद्रांतर्जलदलवलीलां वितनुते तदाचष्टे लोकः
शशक इति नो मां प्रति तथा। अहं त्विंदुं मन्ये त्वदरिविरहाक्रांततरुणीकटाक्षोल्कापातव्रणकि
णकलंकांकिततनुं। अत्र कटाक्षोल्कापातव्रणकिणाकसंकीकिततनुमिंदुमहं मन्ये इत्यनेन
स्वमतद्वारकमुत्प्रेक्षायाः समर्थनं कृतमित्ययं मताभिधानमुत्प्रेक्षाया एव प्रकारः॥ ॥अप्रस्तुतप्रशंसास्या १८१
द्स्तोतव्यस्ययास्तुतिः। कुतोपि हेतोर्वीच्या च प्रत्येतव्या च सोच्यते। सा च धर्मार्थकामानां प्रायोन्यतमबाधया

स्वाभिप्रायप्रसिद्ध्याचजायमानेहदृश्यते।तास्तुधर्मबाध्यायथा।मेदःछेदकृशोदरंलघुभवत्युत्थानयो
ग्यंवपुःसत्वानामपिलक्ष्यतेविकृतिमच्चेतोभयक्रोधयोः।उत्कर्षःसचधन्विनांयदिषवःसिध्यंतिलक्ष्ये
चलेमिथ्यैवव्यसनंवदंतिमृगयामीदृग्विनोदःकुतः।अत्रयथोक्तैर्हेतुभिःस्वाभिप्रायसाधनेनयदीदमीदृ
ग्विनोदःकुतःइतिसाक्षान्मृगयाभिनंदनं।सेयंव्याख्यानामप्रस्कंतस्कंतिरहिंसापरमोधर्मइतिधर्मं
बाधते।धर्मबाधयैवप्रत्येतव्यायथा।कालक्खरदुस्सिक्खिअबालअरेलग्गमज्झकंठम्मि।दोण्ह
विणरअणिवासोसमअंजइहोइताहोउ।अत्रकालाक्षरदुःशिक्षितेत्यनेनलिपिज्ञानादिभिर्धी
नधर्मशास्त्राभिमतरूपकपोगंडःकोपिकयापिअविनयवत्यासोपालंभेणहिरेकंठेलगेत्यभिधु

१८२ 182 ज्यते। तत्र यदिति मतमेवं कृते नरकः स्यात्स यथा वयोः सहैव ना सो न नरक इति। किं तर्हि स्वर्ग इति स्वाभिप्रा
यसाधनात्महासाहसे नियोगस्तस्येह साक्षादस्कृतस्यास्तोतव्यस्य स्कृतिः प्रतीयते। सेयं प्रत्येतव्या
नामाप्रस्कृतप्रशंसा। परस्परदारान्मनसापि नेच्छेदिति धर्ममेव बाधते। अर्थबाधयावाच्या यथा। पंगो
वंद्यस्त्वमसि न गृहं यासि यो ऽर्थः परेषां धन्यो ऽधन्य त्वं धनमदवतां नेक्षसे यत्सुखानि। श्लाघ्यो मूकत्वमसि क
परां स्तोषि नार्थाशया यः स्तोतव्यस्त्वं बधिर न गिरं यः खलानां शृणोषि। अत्र स्तोतव्यानां पंग्वन्धमूकबधि
राणां वंद्य धन्य श्लाघ्य स्तोतव्य पदैः साक्षादभिनंदनादिपं वाच्यानामाप्रस्कृतप्रशंसा ऽभिमानिनो १८२
ऽर्थसिद्धिं बाधते। अर्थबाधयैव प्रत्येतव्या यथा। कामं वनेषु हरिणास्तृणानि खादंत्ययत्नसुलभानि। वि

दधतिध्वनिपुनर्दैन्यं ते किल पशवो वयं तु धियः। अत्र ते किल पशवो वयं तु धिय इति मृगाणाम साक्षादभि
नंदनं नैनेयमस्तोतव्यानाममीषां वाक्यार्थत्वेन स्फुरति प्रतीतेः प्रसेतव्यानामाप्रस्तुतप्रशंसामनिस्तेनोर्थ
सिद्धिं बाधते। काममबाधया वाच्या यथा। एामुअंति दीहसासं राएरुअंति एहोति विरहकिसिआओ ध
एणाओ ताओ जाणं बहुवल्लह वल्लहो ण तुमं। अत्र धन्यास्ता यासां त्वं न वल्लभ इति येयमतिरक्तायाः सा
क्षाद्स्तोतव्यस्फूर्तिः सेयं वाच्यानामाप्रस्तुतप्रशंसा तस्या एव कामसिद्धिं बाधते। काममबाधयैव प्रत्येतव्या
यथा। सहह उंछ अंजसां दुल्लहं प्पिहराहिआणं तो। उअ अआर अजरजीअपरोत्तणकआ वराही सि। अत्र
पूर्वोक्तास्मदभिप्रायसिद्धेर्वल्लोमतयास्माकमुपकृतं येन जीवितमपिहारल्लापराध्यसीति ज्वरं प्रतियद इति

१८३ 183 रक्ततयावाक्यंनेनेहास्तोतव्यस्यज्वरस्यस्तुतिःप्रतीयते।सेयंप्रत्येतव्यानामाप्रस्तुतप्रशंसा।तस्माएशरीर
बाधयासर्वानपिकामान्बाधते।विवक्षितगुणोत्कृष्टैर्यत्समीकृत्यकस्यचित्।कीर्त्तनंस्तुतिनिंदार्थंसाम
तातुल्ययोगिता।साभिधीयमानतुल्यगुणत्वेनस्तुत्यर्थायथा।शेषोहिमगिरिस्त्वंचमहांतोगुरवःस्थिराः।इ
मांलंघितमर्यादांचलंतींबिभृथक्षितिं।अत्राभिधीयमानमहत्वादिगुणोत्कृष्टाभ्यांशेषादितुषारशैलाभ्यां
सहस्तुत्यर्थंतुल्ययोगेनक्षितिपतेरभिहितत्वादियंस्तुत्यर्थातुल्ययोगिता।अभिधीयमानेतुल्यगुणत्व
एवनिंदार्थातुल्ययोगिता।प्रतीयमानतुल्यगुणत्वेस्तुत्यर्थायथा।यमःकुबेरोवरुणःसहस्राक्षोभवानपि १८३
।बिभ्रत्यनन्यविषयांलोकपालाइतिश्रुतिं।अत्रयमादयःपंचभवंतोलोकपालाइत्यनुक्रममपितुल्य

वस्तुयोगितयैववस्तुस्वरूपमेषांमिथःसादृश्यंप्रतीयते।सेयंप्रतीयमानतुल्यगुणत्वेस्तुत्यर्थातुल्ययोगिता
।प्रतीयमानतुल्यगुणत्वएवनिंदार्थायथा।राजानमपिसेवंतेविषमप्युपभुंजते।रमंतेचपरस्त्रीभिरहो
साहसिकानराः।अत्रयोपसेवादिर्मानवानांराजविषयेस्त्रीषुचवैषम्यहेतुस्तुल्यत्वेनयोगः।राजादी
नांवाकर्मतादिरूपतयातक्रियायांसमावेशः।सोमीषांमिथःसादृश्यंप्रत्याययन्राजसेवापरस्त्रीरत्योर्वि
षोपभोगतुल्यतांगमतीतिसेयंप्रतीयमानतुल्यगुणत्वेनिंदार्थातुल्ययोगिता।अन्येस्तुस्वनिमित्तेचदुः
खहेतौचवस्तुनि।स्तुतिनिंदार्थमेवाहुस्तुल्यत्वेतुल्ययोगिताम्।सास्तुत्यर्थायथा।आहूतस्याभिषे
कायविसृष्टस्यवनायच।नमयालक्षितस्तस्यस्वल्पोप्याकारविभ्रमः।अत्ररामस्यराज्याभिषेकवनग

१८४ 184 मनयोः पितुरादेशेन तुल्यरूपतया स्तुतिः प्रतीयते। निंदार्थो यथा। यश्च निंबं परशुना यश्चैनं मधुसर्पिषा। यश्चै
नं गंधमाल्याभ्यां सर्वस्य कटुरेव सः। अत्र यः परशुना छिनत्ति योऽमुं मधुसर्पिषा सिंचति यो वा गंधमाल्याभ्या
मर्चति। तं प्रति तुल्यमेव निंबस्य कटुत्वमिति समासोक्त्या तदुपमेयस्य निंदा प्रतीयते॥ ॥ दोषस्य यो गुणी
भावो दोषीभावो गुणस्य यः। स लेशः स्यात्ततो नान्या व्याजस्तुतिरपीष्यते। तत्र दोषस्य गुणीभावे लेशो य
था। धुर्वैष गुणवान्राजा योग्यस्ते पतिरूर्जितः। रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि। अत्र येयमुत्त
रार्द्धे राज्ञो वीर्यप्रकर्षस्य स्तुतिः सा कन्याया निरंतराभोगान्निर्विविक्षोः दोषत्वेन प्रतिभासिष्यत इत्यभि १८४
प्रेत्य योयं विदग्धसख्या राजप्रकोपपरिजिहीर्षया दोषोपि गुणरूपेणोक्तः सोयं दोषस्य गुणीभावो नाम ले

शतोल्पतयाशनैरनन्यविदितमुच्यमानो लेश इत्युक्तो। गुणस्य दोषीभावो यथा। चपलो निर्दयश्चासौ ज
नः किं तेन मे सखि। आगःप्रमार्जनायैव चाटवो येन शिक्षिताः। अत्र पूर्वार्द्धेन मानपरिग्रहानुगुणसखी
नामग्रतः प्रकाशप्रतिज्ञायतदनिर्वाहमाशंकमानातदुपहासं परिजिहीर्षुर्दोषाभासं तद्गुणग्राममाह
। आगःप्रमार्जनायैव चाटवो येन शिक्षिताः इति सोयं गुणस्य दोषीभावो नाम लेशो भवति। अन्ये पुनः स
मस्तमेव लेशलक्षणमाचक्षते। यत्र दोषस्य गुणीभावो गुणस्य च दोषीभावो नाम लेशो भवति। अ
न्ये पुनः समस्तमेव लेशलक्षणमाचक्षते। यत्र दोषस्य गुणीभावो गुणस्य च दोषीभाव इति। सोपि द्विधा
समासोक्त्या असमासोक्त्या च। तयोः समासोक्त्या यथा। गुणानामेव दौरात्म्याद्धुरि धुर्यो नियुज्यते। अत्र सं

१८५ जातकिणस्कंधःसुखंस्वपितिगोर्गलिः।अयमपिप्रकोपभयाल्लेशेनैवोच्यतइतिलेशः।असमासोक्त्यायथा
।संतःसच्चरितोदयव्यसनिनःप्रादुर्भवद्यंत्रणाःसर्वत्रैवजनापवादचकिताजीवंतिदुःखंसदा।अव्युत्पन्न
मतिःकृतेननसतानैवासताव्याकुलोयुक्तायुक्तविवेकशून्यहृदयोधन्योजनःप्राकृतः।अत्रापिप्रकोपभया
दिपूर्ववत्।अथैवमस्तुलक्षणंतेनकस्माल्लेशइत्युच्यते।दोषगुणीभावस्यप्रस्तुतस्यगुणीभाव
सतुव्याजस्तुत्यपहारात्।व्याजस्तुतिरपिद्वेधा।शुद्धामिश्राच।तयोःशुद्धायथा।पुंसःपुराणादाच्छिद्यश्री
स्त्वयापरिभुज्यते।राजन्निक्ष्वाकुवंश्यस्यकिमिदंतवयुज्यते।अत्रस्तुत्युपरदारापहरणलक्षणनिंदाव्याजे १८५
नस्तुतेविहितत्वादियंशुद्धानामव्याजस्तुतिर्गुणदोषीभावलक्षणाल्लेशात्पृथक्।मिश्रायथा।प्रियो

सिप्राज्ञोसिप्रभुरासिकुलीनोस्यास्सिसुवासुवस्य स्त्वामेवं कत्निनपतिमुवरु शत्रू शत्रू णाते। अतश्चेतां कीर्तिं रघुन
हुषमां धात्महिषीं पराम्रष्टुं हृष्टामधिगतनयो नाईति भवान्। अत्र स्कृतिपूदमिश्रेव व्याजगर्हया स्कृति
रितिरयं मिश्रानामव्याजस्कतिर्लेशभेदः॥ ॥कर्त्रादीनां समावेशः सहान्यैर्यः क्रियादिषु। विविक्तश्चा
विविक्तश्च सहोक्तिः सा निगद्यते। वैसादृश्यवती चेयमुच्यमाना मनीषिभिः। सहेवादिप्रयोगेषु स सादृ
श्याच्च दृश्यते। साकर्तृविविक्तक्रियासमावेशे यथा। कोकिलालापमधुराः सुगंधिवनवायवः। यांति सार्द्धं
जनानंदैर्वृद्धिं सुरभिवासराः। अत्र सुरभिवासरा इति कर्तृपदार्थः केवल एव जनानंदैः सह वृद्धिप्राप्तिक्रि
यायां समाविष्ट इति सेयं विविक्तकर्तृक्रियासमावेशानामवैसादृश्यवती सहोक्तिः। कर्मणो विविक्तक्रि

१८६ क्रियासमावेशे यथा। तं भसि पिअ्राइ समअं तह विक्कोरेण भणसि कीस किसिअं ति उअरिभरेण अअ सुअमु
186 अरुवरल्लो विअंगाई। अत्र असंबोध्यमानयुष्मदर्थः कर्मतामापन्न उत्य सद्गति क्रियायां केवल एव प्रियापदार्थे
न सह समाविष्टः सेयं विविक्तक्रियासमावेशा नाम वैसादृश्यवती सहोक्तिः॥ ॥यत्रानेकोपि कर्त्रादिः प्रविविक्तैः
क्रियादिभिः॥ विविक्तभावं लभते विविक्तासापि कथ्यते। सा कर्तृद्वय स्पष्टथक्क्रियासमारेशे यथा। वर्द्धते सह
पांथानां मूर्छया चूतमंजरी। वहंति च समं तेषामश्रुभिर्मलयानिलाः। अत्र चूतमंजरी मूर्छया सहवर्द्धनक्रियायां
मलयानिलाश्चाश्रुभिः सह वहनक्रियायां पृथक् पृथग्विवेकेनैव कर्त्तारः समाविष्टाः सेयमपि विविक्तवर्त्त्वोक्ति १८६
यासमावेशे वैसादृश्यवती सहोक्तिरेवं कर्मणोपि विविके द्रष्टव्या। कर्तृणाम विविक्तक्रियासमावेशे यथा।

धीरेण समं जामा हिअएण समं अणिट्ठिआ उवएसा। उच्छाहेण सह भुआ बाहेण समं गलंति से उल्लावा।
अत्र यामादीनां बहूनां धैर्यादिभिः सह गलनक्रियायामेकस्यामेवाविवेकतः समावेशो दृश्यते। सेयमविवि
क्तकर्तृक्रियासमावेशा नाम वैसादृश्यवती सहोक्तिः॥ कर्मणा विविक्तक्रियासमावेशेरव शब्देन सह शब्द
स्य स्थाने सादृश्या यथा। धीरं व जलसमूहं तिमिणिवहम्मिव सपक्खपव्वअलोअं। णइसोत्ते व्व तरंगे रअ
णाइं व गरुअगुणसआइं वहंतं। अत्र धैर्येण जलसमूहस्य तिमिनिवहेन सपक्षपक्षपर्वतलोकस्य नदीस्रो
तोभिस्तरंगाणां रत्नैश्च गुरुकगुणशतानां मिथः प्रतीयमानं सादृश्यमिवेन द्योत्यते। सहार्थस्य वाक्यार्थसा
मर्थ्येन लभ्यत इति सेयं धैर्यादीनां बहूनां वहनक्रियायामेकस्यामेव विवेकतः कर्मभूतानां समावेशो नाविवि

१८७ क्तकर्मक्रियासमावेशानामसमसादृश्यासहोक्तिः। आदिग्रहणाद्गुणसमावेशेऽपि गुणिनः ससादृश्या यथा
187 महद्दीर्घा मसमश्वासैरिमाः संप्रतिरात्रयः। पांडुराश्च ममैवांगैः सहताश्वं द्रभूषणाः। अत्र रात्रयो दीर्घाः पांडुराश्चे
ति दैर्घ्येण पांडुरत्वगुणयोरविवेकेन रात्रिषु गात्रीणां च तयोः श्वासैरंगैश्च सह समावेशो दृश्यते। सेयमविवि
क्तगुणसमावेशानामस्त्वाद्यप्रयोगेऽपि ससादृश्या सहोक्तिः॥ ॥द्रव्यक्रियागुणादीनां क्रियाद्रव्यगुणादि
षु। निवेशनमनेकेषामेकतः स्यात्समुच्चयः। इतरेतरयोगोऽयं समाहारो य उच्यते। अन्वाचय इहान्योऽयं सोऽपि
नान्यः समुच्चयात्। द्विपदाश्रयश्च स स्यात्स स्याद्बहुपदाश्रयः। उभयाश्रयश्च स स्यात्स स्यादनुभयाश्रयः। १८७
त्रयः प्रतिपदं वा स्युर्द्योतकैरुत्तरत्र वा। पदैः शुद्धाः च मिश्राश्च तुरीयो द्योतकं विना। तत्र द्विपदाश्रयः प्रतिपदा श्रि

तद्योतकत्वेनद्रव्ययोःक्रियासमुच्चयोयथा॥निर्धतापरिजनेनबोधितःस्फूर्जमानरुचिरुल्लसद्दशः।ह्वा
रसंवलनमांसलोधिकंदीपकश्चमदनश्चदिद्युते।अत्रदीपकश्चमदनश्चेतिद्वेद्रव्येप्रतिपदंचकारेणोक
स्यांदिद्युतइतिक्रियायांसमुच्चयेननिवेशितेइतिनदिद्युतातेइतिद्विवचनं।दीपकमदनावितिचार्थेद्वंद्व
श्चनभवति।द्विपदाश्रयएवोत्तरपदाश्रितद्योतकेनक्रिययोर्द्रव्यसमुच्चयोयथा॥निकामंक्षामांगीसर
सकदलीगर्भसुभगाकलाशेषामूर्त्तिःशशिनइवनेत्रोत्सवकरी।अवस्थामापन्नामदनदहनोद्दाहवि
धुराभिपन्नःकल्याणीरमयतिमनःकंपयतिच।अत्ररमयतिकंपयतिचेतिद्वेक्रियेउत्तरपदस्थेनचकारे
णैकस्मिन्नेवलक्षणेद्रव्येकर्मणिसमुच्चयेनैककालमेवनिवेशितेतेनायमन्वाचयोनभवति।वकुप

दाश्रयः प्रतिपदाश्रितद्योतकत्वेन गुणानां क्रियासमुच्चयो यथा। अप्राकृतस्तु कथमस्तु न विस्मयाय यस्मिन्नु
वासकरुणा च कृतज्ञता च। लक्ष्मीश्च सात्त्विकगुणज्वलितं च तेजो धर्मश्च मानविजयौ च पराक्रमश्च॥ अत्र क
रुणा च कृतज्ञता चेत्यादयो गुणाः प्रत्येकं बहुपदाश्रयत्वेन चकारेणैकस्यामुक्तासेति क्रियायां समुच्चये
न निवेश्यन्ते। तेन गुणेषु बहुवचनं न भवति। करुणाकृतज्ञतादीनां द्वन्द्वसमासश्च न भवति। यस्मिंस्त्वपेक्षा
यां चायमेव गुणानां द्रव्यसमुच्चयो भवति। बहुपदाश्रयस्त्वोत्रपदाश्रितद्योतकत्वेन गुणानां क्रियासमुच्चयो
यथा। रूपमप्रतिविधानमनोज्ञं प्रेम कार्यमनपेक्षविकाशि। चाटु चाकृतकत्वेन गुणानां क्रियासमुच्च
यो यथा। रूपमप्रतिविधानमनोज्ञं प्रेम कार्यमनपेक्षविकाशि। चाटु चाकृतकसम्भ्रममासां कार्मणत्वमग

मद्ममणेषु। अत्र रूपं प्रेम चादुचेतिबहवो गुणाः उत्तरपदाश्रयेण चकारेणागमदित्येकस्यां क्रियायां समुच्च
येन निवेश्यंते। तेनागमन्निति बहुवचनं द्वंद्वो वा न स्यात्। कार्मणत्वमित्यपेक्षायां चायमेव गुणानां जाति
समुच्चयो भवति। उभयपदाश्रयश्चत्ररपदाश्रितैर्द्योतकत्वेन द्रव्यगुणानां क्रियासमुच्चयो यथा। विचिंत्यमानं म
नसापि देहिनामिदं हि लोकेषु चकास्ति दुर्लभं। निशा सचंद्रा मदिरा च सोत्पला प्रियानुरागोभिनवं च यौव
नं। अत्र निशा मदिरा चे द्रव्ये। अनुरागो यौवनं च गुणौ बहुष्वपि पदेषु द्वंद्वे सत्यपि उत्तरपदाश्रयनिवेशिना
चकारेण चकास्तीत्येकस्यां क्रियायां निवेश्यंते। तेन चकासतीति बहुवचनं समासश्च न स्यात्। अयमेव
च दुर्लभमित्यपेक्षायां द्रव्यगुणानां गुणसमुच्चयो भवति। तिमीत्रयोपिभुद्वाः। मिश्रः पुनरुभयपदाश्रयवद्

१८९ 189 कुपदाश्रयश्च भवति। यथा। आदित्यचंद्रावनिलोनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च
संध्ये धर्मश्च जानाति नरस्य वृत्तं। अत्रादित्यचंद्राद्योर्द्रव्यविशेषाः उत्तरपदनिवेशिनाप्रतिपादनिवेशिना
च चकारेण च जानातीति एकस्यां क्रियायां निवेश्यंते। तेन च बहुवचनाभावे समासाभावे चैषमिश्रः समुच्च
यभेदो भवति। अनुभयाश्रयस्तु समुच्चयोन्वाचयश्च न भवति। द्वयोरपि दीपकेन विषयापहारात्। तेनेतरेतरयो
गसमाहारयोः स्तत्राद्रियते। तत्रेतरेतरयोगो यथा। सावशेषपदमुक्तमुपेक्षा त्वत्स्तमाल्यवसेनाभरणोषु। गंतुमु
त्थितमकारणातः स्मद्योतयंति मदविभ्रमभासं। अत्रोक्तमुपेक्षोत्थितमित्येते क्रियाद्रव्यविशेषाः इतरेतरयो
गेन मदविलासद्योतनक्रियायां निवेश्यंते। तेन द्योतयंतीति बहुवचनं। द्वंद्वसमासश्च तद्विवक्षायां स्यात्। न चेह १८९

द्योतकश्चकारः उत्तरपदे प्रतिपदं विद्यत इति सोयमुभयाश्रयः समुच्चयभेदः। समाहारो यथा। वपुर्विरूपाक्षम
लक्ष्यजन्मता दिगंबरत्वेन निवेदितं वसु। वरेषु यद्बालमृगाक्षि मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने। अत्र
त्रयहरेषु मृग्यते तत्किं त्रिलोचने व्यस्तमप्यस्तीति ब्रुवन्वपुर्वयोवस्तूनां समुदायं समस्तमेवाभिसंधत्ते। तस्या
चाविर्भूतावयवभेदत्वेनेतरेतरयोगस्तिरोहितावयवभेदत्वेन समाहारः। सदृहयदित्येकवचनांतेन नपुंस
केन च कथ्यते। न चेह क्वचिदपि चकारोस्तीति सोयमप्यनुभयाश्रयः समुच्चयभेदः। चयोगेपीतरेतरयोगः स
उत्तरपदयोगेपि यथा। तत्स्मरां विपरिवर्त्ति तद्ध्रियोर्नैष्यतोः शयनमिद्धरागयोः। साबभूव वशावर्त्तिनी द्वयोः
शूलिनः सुवदनामदस्य च। अत्र शूलिनो मदस्य चेत्युत्तरपदाश्रयेण चकारेणाद्दो द्रव्यविशेषो वशावर्त्तिनी

१९० स्येतस्मिन्गुणपदे यदीतरेतरयोगेन संनिवेश्येते तदा विपरिवर्त्तितक्रिययोरस्यादिषु द्वंद्वयोरितिपर्यंतेषु द्वि
190 वचनमेकशेषो वा न स्यात्। सोयमपि द्विपदाश्रयः उत्तराश्रितद्योतकश्च समुच्चयभेदः एवमपरोपीतरेतरयोगे
पि च योगा उदाहार्याः। समाहारस्तु च योगविषयो विचिंत्यमानमित्यादिनैवोक्तः। अन्वाचयस्तु क्रिया
विषय एवोपपद्यते। तत्र चोत्तरपदाश्रय एव चकारो भवति यथा। गच्छंतीनां रमणावसतिं योषितां तत्र न
क्तं रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः। सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीं ता
योत्सर्गस्तनितमुखरो मा च भूर्विक्लवास्ताः। अत्र दर्शयेतुर्वीं कर्मविषयत्वेन क्रियामुपन्यस्यतो १९०
योत्सर्गस्तनितमुखरो मा च भूरिति तत्कर्त्रैव धर्मिण्यकर्मकं क्रियांतरमन्वाचीयते। सोयं भिन्नका

त्तभिन्नविषयत्वाभ्यामन्वायः समुच्चयाद्भिन्नो भवति। नन्वेवं यदि समुच्चयेपि भिन्नविषये क्रिये तुल्य
कालमेव प्रयुज्येते को दोषः स्यान्न कश्चित्। किं तु तस्य समुच्चयमुद्रया विषयोपहृत इति नोदाह्रियते।। स
मासेपीतरेतरयोगादनुभयाश्रितः समुच्चयभेदो यथा। वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये। जगतः पित
रौ वंदे पार्वतीपरमेश्वरौ। अत्र वागर्थाविवेति परवल्लिंगता संपृक्तौ पितराविति त्वत्र योयं पुमान्स्त्रिया पिता
मात्रा इति चैकशेषः। तेनैव विशेषलक्षणयोगाद्युक्तोक्तिस्त्वसत्यलंकारतां लभत इति। न धवखदि
रादिष्वतिप्रसंगः। इत्ययमपि समुच्चयभेदः। समाहारयोदयि यथा। स्त्रीणां हावैः कृते यत्र निजकार्यम
नो भ्रुवा। अक्षिभ्रूवनिभं न्यस्तं तन्मुखे शरकार्मुकं। अत्रापि योपमक्षिभ्रुवं शरकार्मुकमित्येतयोः प्रा

१९१ रात्रूर्यसेनांगानामितिवाङ्मनसाक्षिभ्रुवेतिचविशेषलक्षणायोगस्तेनधवखदिरपलाशमित्येवमादि
षुनातिप्रसंगोभवति॥१३॥विधिनार्थन्निषेधनप्रतिषेधोक्तिरन्यया।शुद्धामिश्राचसाक्षेपोरोधोनाक्षेप
191 तःपृथक्।तत्रविध्याक्षेपःशुद्धोयथा।गच्छगच्छसिचेत्कांतपंथानःसंतुतेशिवाः।ममापिजन्मतत्रैवभू
याद्यत्रगतोभवान्।अत्रगच्छेत्यस्यविधिवाक्यस्यममापिजन्मतत्रैवभूयादित्याशिषाअनुकूलतयैवम
रणसूचनान्निषेधःक्रियतइतिशुद्धोयंविध्याक्षेपः।मिश्रोयथा।अलंविवादेनयथाश्रुतंत्वयातथा
विधस्तावदशेषमस्तु सः।ममात्रभावैकरसंमनःस्थितंनकामवृत्तिर्वचनीयमीक्षते।अत्रालंविवादेनेति १९१
निषेधेनतथाविधःसोस्त्वितिविधिनाचतन्मतमवस्थाप्यममात्रभावैकरसंमनःस्थितमितिविधिनान

कामहन्निर्वचनीयमीक्षत इति प्रतिषेधेन च पृष्टुनराक्षिप्यते सोयं विधिनिषेधाभ्यो विधिमिश्र आक्षेपो भवति। नि
षेधाक्षेपः शुद्धो यथा॥ कुतः कुवलयं कर्णे करोषि कलभाषिणि। किमपांगमपर्याप्तमस्मिन्कर्मणि मन्यसे॥ अ
त्र कुतः कुवलयं कर्णे करोषीत्यस्य निषेधवाक्यस्य किमपांगमित्यादिना प्रश्नपरेणापि निषेधपर्यवसायिना वा
क्येन समर्थनं क्रियत इत्ययं शुद्धो निषेधाक्षेपः मिश्रो यथा। सच्चगरुआ गिरिणो को भणइ जलासआ ण गंभी
रा। धीरेहिं उवमाउं तह वि क्कमहणाण्यि उच्छाहे॥ अत्र सत्यं गुरवो पि गिरय इति विधिः कथ्याह जलाशया न गंभीरा
इति परमताक्षेपः। ताभ्यो गिरीणां गुरुत्वं सागराणां च गांभीर्यं यद्यप्युत्तरार्द्धेन धीरापेक्षया निषेधति। अन्यापेक्ष
या तत्त्वदेव विधत्ते। स एव मिश्रो निषेधाक्षेपः। रोधोनाक्षेपतः पृथग्गिरुक्तं तत्रैतावान् विशेषः॥ क्रियास्वनि ष

११२ मानस्यवारणंकारणेनयत।उक्तावुक्ताचरोधोयश्चाक्षेपः सोयमुच्यते।प्रतिकूलोनुकूलश्चविधोरोधोभिधीयते
।निषेधेणुक्तिभ्यां द्विप्रकारः सकथ्यतेतत्रोक्ताविधौप्रतिकूलोयथा।किंजंप्पिएणादहमुहजंपिअसरिसंचआणि
112 व्वहंतस्सभरं।एत्तिअजंपिअसमाणिहणंअसेविवज्जधारासुगच्चा।अत्रकिमःप्रतिकूलवाचित्वाद्वचनदृस्यैव
वजस्यनदशाननश्चित्ररथेनरुद्धः।कारणंचवज्रप्रभावकीर्तनादितिप्रातिकूल्येनोपन्यस्तं।सोयमोक्तःप्रतिकू
लश्चविध्याक्षेपोरोधइत्युच्यते।उक्तैवविधावनुकूलोयथा।हंत्तुंविमग्गमाणोहंतुतुरिअस्सअप्पणादहव
अणं।किंरक्खसिकाउंसेपवअवइपिअंतिविप्पिअंरक्कुवइणो।अत्रापिकिमःप्रतिषेधवाचित्वाद्वचनदृस्यैव ११२
दशाननवधायोत्तिष्ठमानः सुग्रीवोजांबवतारुद्धः कारणंपुनरानुकूल्येनैवोक्तं।किमेतत्त्वयारघुपतेःप्रियरूप

विप्रियमुपक्रांतमिति सोयमोक्तोऽनुकूलश्चविध्याक्षेपोरोधइत्युच्यते। विधावेवयुक्त्याऽनुकूलः प्रतिकू
लश्चयथा। गच्छेति वक्तुमिच्छामि त्वत्प्रियं मत्प्रियैषिणी। निर्गच्छेति मुखाद्वाणी माभूदिति करोमि किं। अ
त्रयथोक्तमुक्त्वा किंकरोमीत्यानुकूल्येनैवोह। अत्र किमः प्रश्नार्थत्वेपियुक्त्या निषेधार्थत्वंगम्यते। सो
यंयोक्तोनुकूलो योक्तश्च विध्याक्षेपोरोधइत्युच्यते। अपमेव चास्यावैपरीत्योक्तिपक्षेयोक्तप्रतिकूलविध्या
क्षेपोरोधो भवति। युक्त्या निषेधे प्रतिकूलो यथा। पउरजुआणो गामो महुमासो जोव्वणं पई ठेरो। जंसोसुरा
साहीणा असई मा होउ किं मरउ। अत्र किमः काक्वा सासूयप्रश्नार्थस्य युक्त्या निषेधार्थत्वंगम्यते। सोयं
योक्तः प्रतिकूल निषेधाक्षेपोरोधं इत्युच्यते। युक्त्यैव निषेधेनुकूलो यथा। कहमा। इस्सज्जगमस्सोइ

१९३ 193 मीऋकंदोहृदलसरिच्छेहिं।अच्छीहिंजोणादीसइयणात्थणभरुद्दूपसरेहिं।अत्रस्तनादिवदस्यामध्यो ।
पिमाक्षीयतामितिनिषेधवादीकेनचिदानुकूल्येनरुध्यते।कथमयंमाक्षीयतामितियोस्याःकुवलयद
लसदृशाभ्यांलोचनाभ्यांघनस्तनरुद्धप्रसराभ्यांनदृश्यते।इयंत्वेताभ्यामन्यमीक्षमाणायत्नपश्यतिस्ते
हमिवमध्योपिक्षीयमाणोलक्ष्यते।तत्रकिमः प्रश्नार्थत्वेनिषेधार्थत्वंगम्यते।सोयंयोक्तोनुकूलश्चनिषे
धाक्षेपोरोधइत्युच्यते।निषेधएवोक्त्याप्रतिकूलोनुकूलश्चयथा।भ्रूकुटिरारचितागतमग्रतोहतमथा
ननमुक्तमसाध्वा।इयमतिप्रभुताक्रियतेबलादकुपितोपिहियत्कुपितोजनैः।अत्राकुपितोपिकुपि १९३
तःक्रियतइतियोयंनिषेधाक्षेपरूपउपालंभः तत्रभ्रूकुटिरारचितेत्यादिवैयास्येनप्रतिकूलकारणामुप

न्यस्य स्तेयमतिप्रभुतामोषं बलात्कार इति काकावाचनिकमेवोपालंभमभिधत्ते। तेनायमोक्तः प्रतिकू
लस्य निषेधाक्षेपो रोध इत्युच्यते। अयमेव चास्याश्रवैयात्योक्तिपक्षे स्वरूपव्यानादोक्तोनुकूलनिषे
धाक्षेपो रोधो भवति। यदा तु कारणमुपन्यस्यापि क्रियास्तुत्रिष्ठमानो न रुध्यते। तदाक्षेप एव न रोधः। तद्य
था।। गमिस्साकलंबवणाआदिट्ठुं मेहंधआरिच्छंगच्छणाच्छलं। सहिस्रोगज्जिअसद्दोतह विक्कसेणत्थि
जीविए आसंघो। अत्र कदंबवातादिवाहनादीनां जीवितात्ययहेतूनामुपन्यासेपि क्रियास्तुत्रिष्ठमा
नो न रुध्यते। कथमयं न जीवतीति। किं तर्हि कारणमेवाक्षिप्यते। तथापि नास्य स्वजीविते ध्यवसाय इ
ति। सोयमाक्षेप एव न रोधः। क्रियाघातस्यापि वारणो कारणानामन्यपरत्वे रोधो न भवति। यथा। धवं च बकु

१९४ लभ्यंते स्तुवंक्षेमश्च चवर्त्मनि। न च मे प्राणसंदेहस्तथापि प्रियमास्मगाः। अत्र पद्यपिपासोद्यतः प्रियो रुध्य
ते प्रभूतार्थलाभादीनां कारणानां गमनपात्त्वमेव न निवारणपरत्वमतोयं न रोधः किं तर्हि आक्षेप एव भव
194 ति॥ ॥ ज्ञेयः सोर्थांतरन्यासो वस्तु प्रस्तुत्य किंचन। तत्साधनसमर्थस्य न्यासो योन्यस्य वस्तुनः। सउपन्यस्त
वस्तूनां साधर्म्येण च कथ्यते। वैधर्म्येण च विद्वद्भिर्वैपरीत्येन कुत्रचित्। तेषु साधर्म्येण यथा। पयोमुचः परी
तापं हरंत्येते शरीरिणां। न चात्मलाभो महतां परदुःखोपशांतये। अत्र परीतापहरणक्षमस्य जलदाख्यस्य
महावस्तुनो न्यसनं विधाय तत्साधनसाधर्म्येणैव तत्साधनक्षमं महापुरुषलक्षणं वस्त्वंतरमुपन्यस्यति १९४
। सोयं साधर्म्येणार्थांतरन्यासः। वैधर्म्येण यथा। प्रियेण संग्रथ्य विपक्षसंन्निधावुपाहितां वक्षसि पीवर

स्तनो। स्रजं न काचिद्विजहौ जलाविलां वसंति हि प्रेम्णि गुणा न वस्तुनि। अत्रापि प्रियतमेन स्वयं कांता
हृदये समारोपिता या: स्रजः प्रेमकारणमुपन्यस्य जलाविलदोषवत्या अपि यदत्यागकारणं तद्दिह वै
धर्म्यद्वारेण प्रतिपादितमतो वैधर्म्येणायमर्थांतरन्यासः। विपर्ययेणा यथा। जो जस्स हि अ अदपि अओ दुः
खं देंतो वि सो सुहं देइ। दइअणहदूमिआण वि वड्ढइ थणाण रोमंचो। अत्र साधनस्य समर्थवस्तुनः प्रथम
त एवोपन्यस्य पश्चात्तत्साध्यमभिहितमिति विपर्यासादयं विपर्ययो नामार्थांतरन्यासः॥ श्लोकोयस्तूभय
न्यासोऽर्थांतरन्यास एव सः। स प्रत्यनीकन्यासश्च प्रतीकन्यास एव च। तत्रोभयन्यासो यथा। ते विरला सप्पु
रिसा जे अभणंता घडंति कज्जालावे। थोअ च्चिअ ते वि दुमा जे अमुणिअकुसुमणिग्गमा देंति फलं।

१९५ अत्रविद्यमानमपि साध्यसाधनभावमप्रतिपाद्य यदुभयोर्वस्तुनोर्न्यसनं सोयमुभयन्यासः। प्रत्यनीकन्या
195 सोयथा। विरलाउवआरिइच्चिअणिरवेक्खा जलहरव्वच्चंति। झिज्झंति तिणा णाविरहे विरलच्चिअसरि
प्पवाहव्व। अत्रेयपदिदमुपकृत्यानपेक्षितप्रत्युपकाराणां गमनं। यच्चाकृतप्रत्युपकाराणां तद्विरहे अव
सादनं। तदुभयमपि जलधरसरित्प्रवाहयोरन्योन्यातिशयितयोरुपन्यस्यमानं प्रत्यनीकन्यासो भवति
। प्रतीकन्यासो यथा। काकथा वाणसंधाने ज्याशब्देनैव हूरतः। हुंकारेणेव धनुषः स हि विघ्नानपोहति
। अत्र विघ्नोत्सारणसमर्थया बाणमोक्षणलक्षणायाः क्रियायाः प्रथमावयवभूतं ज्याशब्दं धनु १९५
षो हुंकारमिवेति तत्साधनमुपन्यस्य प्रतीकन्यासनामानमर्थान्तरन्यासमभिधत्ते॥ ॥गुणाजातीक्रि

यादीनांयत्रवैकल्यदर्शनं।विशेषदर्शनायैवसा।विशेषोक्तिरिष्यते।प्रत्येतव्येभिधेयेचसाविशेषस्यका
रणावैकल्यादर्शनेनापिकचिदप्युपपद्यते।सागुणवैकल्येनयथा।नकठोरंनवातीक्ष्णमायुधंपुष्प
धन्वनः।तथापिजितमेवाभूदमुनाभुवनत्रयं।अत्रातीक्ष्णेनाकठोरेणचायुधेनपुष्पधन्वात्रीणिजगं
तिविजयतइतितस्यप्रभावातिशयःप्रतीयते।सेयंप्रतीयमानविशेषहेतुर्गुणवैकल्यवतीविशेषोक्तिः।
जातिवैकल्येनयथा।नदेवकन्यकानापिगंधर्वकुलसंभवा।तथाप्येषातपोभंगंविधातुंवेधसोप्यलं।
अत्रदेवकन्यकादित्वाभावेप्येषावेधसोपितयोभंगंविधातुमलमितिवर्णनीयरूपातिशयःप्रतीय
ते।सेयंप्रतीयमानविशेषहेतुर्जातिवैकल्यवतीविशेषोक्तिः।क्रियावैकल्येनयथा।नबद्धाभ्रुकुटिर्नापि

१९६ स्फुरितोरदनच्छदः। नचरक्ताभवद्दृष्टिर्जितंचद्विषतांकुलं। अत्रभ्रूभंगादेरभावेपियोयंद्विषतांजयस्तेनवर्ण
196 नीयस्यप्रतापातिशयःप्रतीयते। सेयंप्रतीयमानविशेषहेतुःक्रियावैकल्यवतीविशेषोक्तिः। आदिग्रहणाद्
अवैकल्येनयथा। नरथानचमातंगानहयानचपत्तयः। स्त्रीणामपांगदृष्ट्यैवजीयतेजगतांत्रयं। अत्ररथा
देरभावेपिजगत्त्रयविजयहेतुःस्त्रीणामपांगावलोकनमभिधीयते। सेयमभिधेयविशेषहेतुर्द्रव्यवै
कल्यवतीविशेषोक्तिः। द्रव्यस्यापिवैकल्येनयथा। एकचक्रोरथोयंताविकलोविषमाहयाः। आक्रमत्ये
वतेजस्वीतथाप्यर्कोजगत्त्रयं। अत्ररथादीनांद्रव्याणामेकचक्रतादिभिर्वैकल्येपियदेतद्भगवतोभा १९६
स्करस्यभुवनत्रयाक्रमणंतस्यहतेजस्विताहेतुरभिधीयते। सेयमभिधेयविशेषहेतुर्वैकल्यवद्द्रव्याणामप

रविशेषोक्तिः। द्रव्यसंयोगायोगाभ्यामेवैकल्पेनापि किंचिद्दैषा विशेषाया विशेषाय नयथा। अयं तया
रथ्यक्षोभाद्दंसेनांसोनिपीडितः। एकः कृती शरीरेस्मिन्नेषमंगं भुवो भरः। अत्रायं तया स्पृष्टांसः सपुण्य
वान्तयाचास्पृष्टं शेषमंगमेनिरर्थकमिति योयमेवैकल्पदर्शनेपि विशेषः तेनैषा हेतुमत्यपि हेतुमताविः
शेष्यमाणा यथोक्ता विशेषोक्तिर्भवति। या पुनरिहार्वश्यामितो वाक्याद्गुणादि विशिष्टावगतिः सा पर्यायो
क्तिर्न विशेषोक्तिः॥ ॥क्रियाकारकसंबन्धिसाध्यदृष्टांतवस्तुषु क्रियापदार्थोपस्कारमाहुः परिकरं बुधाः।
तेषु क्रियापरिकरो यथा। ववसितिणिवेरम्यत्योसोमारुरलद्धूपच्च आगम्प्य हरिस्तं। सुग्रीवेणाउरत्थल
वणमालामलिअरंउवऊरे। अत्रमारुतिलब्धप्रत्ययागतहर्षमित्यनेनउरत्थलवनमालामृदितम

१९७ 197 धकरमित्यनेनचोपगूहनक्रियायाः परिकरत्वादयंक्रियापरिकः। कारकपरिकरोयथा। पडिआअहत्थसि
ढिलिअणिरोहपंडुरसमूसन्नकवोलं। पल्लिअवामपओहरविसमुण्णअउराहिण्णथणीजणणअसुआ। अत्र
हस्तशिथिलितनिरोधपांडुरसमुच्छ्रसत्कपोलयानेनप्रेरितवामपयोधरविषमोन्नतदक्षिणस्तनीत्यनेनचजन
कस्तुतेतिचकारकपदस्यपरिकरत्वादयंकारकपरिकरः। संबंधिपरिकरोयथा। उम्मूलिआणखुलिआउकिव
पंन्नाणउज्जुअंओसरिआणिज्जंताणणिरिआगिरीणमग्गेणपत्थिआणइमोत्तो। अत्रोध्रियमाणगिर
संबंधिनोऽप्रयोजकाअपिनदीप्रवाहाविशेषणोह्यपस्कुताइतिसंबंधिसारकोयं॥ साध्यपरिकरोयथा॥ १९८
धीरंहरइविसाओविणअंजोव्वणमओअणंगोलज्जं। एकंतगाहिअवक्खोकिंसीसउजंठवेइवअपरिणा

मे। अत्र गतवयसो न धैर्यं न विनयो न लज्जेति साध्यं। विषादयौवनमदानंगक्रियादृष्टांतैरुपस्कृतमिति साध्य
परिकरोयं। दृष्टांतपरिकरो यथा। मह्यसाहृ अधराणि हरंति ज्जइ असमुद्दमंडलं उव्वेलं। रइरह वेअविअलि अपं
डिअं विअउकवउकवकोडिं चक्कं। अत्र प्रक्षिप्तमंदरासमुद्रोदाहरणाभूतेन विरथ्य चक्रमुत्कटास्यकोटीति विशे
षणेन साम्यस्तिद्धये परिकरितमिति दृष्टांतपरिकरोयं। वाक्यपरिकरो यथा। देवीपुत्रमसृतनृत्यतगणाः किंतिष्ठ
न्तु कुजेह षड्गगारिरावुरा हतगिरा चामुंडया लिंगिते। पायाद्वो जितदेववृंदमिषतध्वानः प्रहृष्टस्तयोरन्योन्यां
गनिपातजर्जरतरस्थूलास्थिजन्मा रवः। अत्र चामुंडाभृंगिरिटिपरिष्वंगसंघट्टितपरस्परहृदयास्थिजन्मनः श
ब्दस्य वस्तुतया परिगृहीतस्य देवीपुत्रमसृतेत्यादिभिः परिकरितत्वादयं वाक्यपरिकरः॥ ॥क्रियायथासमासे

१९८ नतथाव्यक्तत्वद्युतादिभिः। विशेष्यते तदाहुस्तं क्रियापरिकरं परं। तत्र क्रतातादर्थ्ये न यथा। गेहाद्याता सरितमुदकं
198 हारिका नाजिह्रीषमंस्यामीति अथ यमियुमुनातीरवीरुद्गृहाणि। गोसंदायी विशसि विपिनान्येव गोवर्द्धनाद्रेर्नत्वं रा
धेदृशा निपतितादेवकीनंदनस्य। अत्र तु मुख्यलोकक्रियायां क्रियार्थायामित्यादिभिरुपपदभूतापि क्रियैव
व विशिष्यते। तेनायमपरः क्रियापरिकरो भवति। एवं लक्षणादिषु शब्दादिभिरपि द्रष्टव्यं। तद्यथा व्ययेन। स
लीलमासक्तनितांतभूषणं समासजंत्या कुसुमावतंसकं। स्तनोपपीडं नुनुदे नितंबिना घनेन कश्चिज्जघने
न कांतया। अत्र स्तनाभ्यामुपपीड्य यंत्रायं नुनुदे इत्यस्यार्थक्रियाविशेषणमेवैतदिति। अयमपि क्रियापरिक १९८
रो भवति। एवं यथाविध्यनुप्रयोगादिष्वपि द्रष्टव्यं। तेन क्रियायाः क्वचिदांतरविशेषणायोगाद्व्यंग्यत्वं भवतीत्य

पिव्यारव्यातं। यथा। शय्यंते हतशायिकाः पथितरुच्छायानिषण्णाध्वगैः श्रीकंठायतनेषु धार्मिकजनैरास्यंतउ
च्छासिकाः। सून्यितत्र निकुंजेशाखिविनिसखिश्री मस्यमध्यंदिने सज्जानां दपितामिसारणविधौ स्यः स्वैरणी
वर्तंते। अत्र उच्छासिकाः आस्यंते हतशायिकाः शय्यंते इत्यमूभ्यां सामान्यविशेषोपचरितरूपाभ्यां भावात्माएवुले
वप्रस्थाप्यते। सत्रास्थाताभ्यां सामान्यरूपेण एवं तु लांताभ्यां विशेषरूपेण॥ बहुवचनं चेह कुत्सातिशयो
र्थीयाहिना मोद्रस्यकुत्सावंस्थोबहुप्रकारत्वं त्वोवक्षाः सुग्रासिकायाश्च हतानामतिशयव्यस्तस्तास्तथा
भूता एवंभूयस्यः शायिकाः प्रतीतास्ताभि विशेषरूपाभिरियमासिकाद्वासनानि हतशायिकाइव शय
नानि क्रियंते भवंतीति वाक्यार्थो भवति। सोयं यथोक्तक्रियापरिकरः॥ कचित्पुनर्बाह्यमपि कृदूपेक्षद

११९ 159 र्थे रूपं वा क्रियाविशेषणं भवति यथा। शतं वारानुक्तः प्रियसखिवचोभिः सपरुषैः सहस्रं निर्धूतः पदनिपात
तः पार्ष्णिहतिभिः। कियत्कृत्वो बद्धाः पुनरिह न वेद्मि भ्रुकुटयस्तथापि क्लिश्यन्मां क्षणमपि न दृष्टो विरमति
। अत्र वारानिति वारशब्दः कृदंतः वारसंख्यायाः कृत्वसुजिति कृत्वसुच् कृदर्थः ताविमोह्यावप्याह त्रिरू
पणं क्रियाविशेषणं भवतः॥ नन्वेवमुच्छ्वासिकादीनां च क्रियाविशेषणत्वात्। कर्मत्वेन नपुंसकलिंगता
पि प्राप्नोति यथा मृदु पचति प्रशस्तं पठतीति। उच्यते॥ त्रिधा खलु क्रियाविशेषणं भवति। बाह्यमाभ्यं
तरं बाह्याभ्यंतरं च। तत्र बाह्यं कर्मरूपं वारादि। आभ्यंतरं विशेषरूपमुच्छ्वासिकादि। बाह्याभ्यंतरं गुणरू ११९
पं मृद्वादि। तेषु बाह्यं सोयमित्यभिधायासंबंधादभेदोपचारेणाविचलितस्वरूपमेव प्रधानं विशिं

षतकथमिवस्वलिंगंजह्यात्। अभ्यंतरंतुविशेषापरिग्रहाद्दाविष्टलिंगसंख्यंकथमिवान्यलिंगंगृह्णीयात्। बा
ह्याभ्यंतरंतुगुणत्वात्स्वलिंगविरहेगुणवचनानामाश्रयतोलिंगवचनानीतिविशेष्यलिंगग्राह्येवभवति। त
द्धितकृत्त्वस्तुचोक्तः॥ थालादिनोच्यते। यथा। अकृतकवलारंभैर्भूयोभयस्थगितेक्षणाः किमपिवलित
ग्रीवंस्थितामुकुरुंगपंक्तयः। गगनमसकृत्पश्यंत्येतास्तथाश्रुघनैर्मुखेनिपततियथाम्बुगात्रेऽम्भोभ्रम
न्नयनोदकं। अत्राद्यः प्रकारवचनेथाल्। अनेकवाराणित्यर्थेअसकृदितितद्धितेनपश्यंतीतिक्रियांवलि
तग्रीवमितिसमासेनकिमपीतिनाम्नाऽव्ययेनस्थितेतिकृतामुहुरितिकृदर्थेवीप्सयाचक्रियाविशेषणे
नसहविशेषयति। द्वितीयश्च यथा भ्रमन्नयनोदकंनिपततीतिशतृलक्षितयापतनक्रियययातमेवार्थमु

२०० नुसंदधानः पूर्वक्रियाया एव विशेषणं भवति। सोयं कृत्तद्धितसमासाव्ययानां संनिपातरूपेपि क्रियापरिकरे
200 यथातथेत्येतयोः प्राधान्यात्तद्धितेनैवापदिश्यते। एतेन तद्यदोर्विपर्ययस्तद्विशेषणयोगश्च व्याख्यातः। तद्यथा। ज
हजहणिसासमप्पइतहतहवेविइतरंगपडिमापडिच्छं। किंकाअघविमूढंवेवइहिअअंवउअहिरिणोससिविंबं
। अत्र यथा तथेति क्रियाविशेषणयोरपरमपि विशेषणं वीप्सा भवति। सोयमेवंप्रकारः क्रियापरिकरो द्रष्टव्यः
॥ क्रियाविशेषणं केश्चित्संबोधनमपीष्यते। संबंधिभिः पदैरेव लक्ष्यंते लक्षणादयः। तेषु संबोधनपरिकरो यथा
॥ धर्मस्योत्सववैजयंतिमुकुटस्रग्वेणि गौरीपते स्त्वां रत्नाकरपत्नि जह्नुतनये भागीरथि प्रार्थये। त्वत्तोयांतशि २००
लानिषण्णवपुषस्त्वद्वीचिभिः प्रेंखतस्त्वन्नाम स्मरतस्त्वदर्पितदृशः प्राणाः प्रयास्यंति मे। अत्र भागीरथीति सं

बोधनपदं धर्मस्योत्सववैजयंतीत्यादिभिः परिक्रियते। तत्र यथाकथंचिदनुच्यमानोर्थः क्रियाविशेषणं नाति
क्रमतीत्ययमपि क्रियापरिकरः। लक्षणपरिकरो यथा। महाप्रथिम्ना जघनस्थलेन सा महेभकुंभोच्चकुचेन वक्ष
सा। मुखेन दीर्घोज्ज्वललोलचक्षुषा वयस्य कांता कथय क्व वर्त्तते। अत्र जघनस्थलादीनि लक्षणानि महाप्रथिम्न
यादिभिः परिक्रियंते सोयं लक्षणपरिकरः। हेतुपरिकरो यथा। त्वया जगंति पुण्यानि त्वया पुण्या जनोक्तयः।
नाथवंतस्त्वया लोकास्त्वमनाथा विपद्यसे। अत्र प्रथमतृतीयपादयोस्त्वया त्वयेति हेतु द्वितीयचतुर्थपादाभ्यां
परिक्रियते सोयं हेतुपरिकरः। महार्थपरिकरो यथा। अनेन यूना सह पार्थिवेन रंभोरु कच्चिन्मनसो रुचिस्ते। शि
प्रातरंगानिलकंपितासु विहर्त्तुमुद्यानपरंपरासु। अत्रानेनेति महार्थो यूना पार्थिवेनेति च पदाभ्यां परिक्रिय

२०१ तेसोयंसहार्थपरिकरः। तादर्थ्यपरिकरो यथा। इंदीवरश्यामतनुर्नृपोयंत्वंरोचनागोरशरीरयष्टिः। अन्योन्यशोभा
परिवृद्धयेवांयोगस्तडित्तोयदयोरिवास्तु। अत्रान्योन्यशोभापरिवृद्धय इति तादर्थ्यार्थैः शेषपदार्थैः परिष्क्रिय
201 तेसोयंतादर्थ्यपरिकरः। उपपदपरिकरो यथा। प्रत्यक्षवस्तुविषयायजगद्धितायविश्वस्थितिप्रलयसंभवका
रणाय। सर्वात्मनेविजितकोपमनोभवायतुभ्यंनमस्त्रिभुवनप्रभवेशिवाय। अत्रनमस्तुभ्यमित्युपपदार्थः स
मस्तपदैः परिष्क्रियतेसोयमुपपदपरिकरः॥ ॥उपमारूपकादीनांशब्दार्थोभयभंगिभिः। साधर्म्योत्पादनं
यत्रमन्येपरिकरंविदुः। तत्रसंशब्दकृतउपमायांयथा। केहकहविरएइयअमगांपुलएइच्छेज़मविस २०१
ई। चोरवकईअलयंलडुंदुः केवणासिठहरइ। अत्रपदमार्गछेदैः शब्दैर्भिन्नार्थैरभिन्नार्थविरचनादिक्रि

यान्निवेशिभिःकविचोरयोरप्रसिद्धमौपम्यंसाधितमितिशाब्दोयमौपम्यपरिकरः। अर्थेकृतोरूपकेयथा॥
विअडेगअणसमुद्देदिअससूरेणमंदरेणवमहिएणणीअइमइरव्वसंझाणिस्सामंगेणअमुअकलसो
व्वससी। अत्रगगनेसमुद्रत्वेननिरूपिते। सूर्यसंध्याशशिभिर्मंदरमदिरामृतकलशैश्चमथनादिक्रियानि
वेशिभिरर्थैःपरस्परोपमानात्साधर्म्यमुत्पादितमित्यार्थोयंरूपकपरिकरः। उभयकृतश्चविरोधश्लेषयो
यथा। रइमुणालाहरणोणलिणदलत्थइअपीवरत्थणअलसो। वहइपिअसंगमम्मिविमअणाअ
प्पपसाहणंजुअइजणो। अत्रप्रियसंगमेपिमदनाकल्पप्रसाधनंभवतीतिविरुद्धार्थयोःसाधर्म्योसा
दनायजलेक्रीडतोयुवतिजनस्ययथोक्तविशेषणाभ्यांशब्दतोर्थतश्चोपस्कारःकृतइत्युभयकृतोयं

२०२ विरोधश्लेषपरिकरः। एवमलंकारांतरेष्वपि द्रष्टव्यं॥ एकावलीति या सापि भिन्ना परिकरान्नहि। त्रिधा सापि समुद्दि
202 ष्टा शब्दार्थोभयभेदतः। तत्र शब्दैकावली यथा। पर्वतभेदि पवित्रं जैत्रं नरकस्य बहुमतंगहनं। हरिमिवह
रिमिव हरिमिव वहति पयः पश्यत पयोष्णी। अत्र हरिमिवहरिमिवहरिमिवेति शब्दैकावल्यापि भिन्नार्थया
पयः कर्मकारकमुपस्थाप्यते सेयं शब्दैकावलीपरिकरस्यैव भेदः। अर्थैकावली यथा। किमिति कबरी याहक्
ताहग्दृशो किमकज्जलेन खलु लिखिताः पत्रावल्यः किमयं कपोलयोः। अयमयमयं किंच क्काम्यत्य सं
स्मरेणनते प्रिय सखि सखीहस्तन्यस्तो विलासपरिच्छदः। अत्रायमयमयमिति सर्वनामपरामृष्यमाण १०२
या भाराणुपन्यस्तकारणा भूतया ततोन्यया वा तथाविधया र्थैकावल्या परिच्छद इति कर्तृकारकमभिन्नार्थं।

वपरिष्क्रियतेसेयमर्थैकावलीपरिकरस्यैवभेदः।उभयैकावलीयथा।अंबातुष्यतिनमयानस्नुषयासापिनांबु
यानमया।अहमपिनतयानतयावदराजन्कस्यदोषोयं।अत्रांबस्नुषाअस्मदर्थलक्षणैरर्थैस्तद्वाचिभिःसर्व
नामभिःशब्दैरेकावलीक्रमेणामिथोनुस्यूतेमिथोनुस्यूतएवतुष्यतीतिक्रियाहेतुमयैस्त्यादिभिःपरिष्क्रिय
तेसेयमुभयग्रथितत्वादुभयैकावलीपरिकरस्यैवभेदः॥ ॥क्रियाजातिगुणद्रव्यवाचिनैकत्रवर्तिना।सर्ववा
क्योपकारश्चेद्दीपकंनिगद्यते।अर्थावृत्तिःपदावृत्तिरुभयावृत्तिरावली।संपुटंसनामामालाचक्रवालंच।तद्भि
दाः।तेषुक्रियावाविनाद्यादिदीपकंयथा।चरंतिचतुरंभोधिवेलोद्यानेषुदंतिनः।चक्रवालाद्रिकुंजेषुकुंद
भासोगुणाश्चते।अत्रचरंतीतिक्रियया हृद्योरपिवाक्ययोरादिपदस्यैवोपकारःक्रियतइत्यादिदीपक

मिदं क्रियाविषयमुच्यते। एवं मध्यांतयोरपि द्रष्टव्यं। जातिवाचिना आदिदीपकं यथा। पवनो दक्षिणः पर्णं जी
र्णं हरति वीरुधां। स एवं च नतांगीं मां मानभंगाय कल्पते। अत्र पवन इत्यादिपादे जातिपदं तेनादिदीपकमिद
जातिविषयमुच्यते। एवं मध्यांतयोरपि द्रष्टव्यं। गुणवाचिना आदिदीपकं यथा। श्यामलाः प्रावृषेण्याभिर्दिशो
जीमूतपंक्तिभिः। भुवश्च सुकुमाराभिर्नवशाद्वलराजिभिः। अत्र श्यामला इत्यादिपादे गुणपदं तेनादिदीप
कमिदं गुणविषयमुच्यते। एवं मध्यांतयोरपि द्रष्टव्यं। द्रव्यवाचिना आदिदीपकं यथा। विष्णुना विक्रमस्थेन
दानवानां विभूतयः। क्वापि नीताः कुतोप्यासन्नानीता दैवतर्द्धयः। अत्र विष्णुनेत्यादिपादे द्रव्यपदं तेनादिदी
पकमिदं द्रव्यविषयमुच्यते। एवं मध्यांतयोरपि द्रष्टव्यं। अर्थावृत्तिर्यथा। हृष्यति चूतेषु चिरं तुष्यैं बकुलेषु

मोदतेमरुति।इहहिमधौकलकूजितेषुपिकेषुप्रीयतेकामी।अत्रहृष्यतितुष्यतिमोदतेप्रीयतइत्येतैःपदैःसमाना
र्थैश्चावर्त्यमानःसर्ववाक्यानिदीपयति।सेयमर्थावृत्तिर्दीपकस्यभेदः।पदावृत्तिर्यथा।उत्कंठयतिमेघानांमा
लतीदंकलापिनां।यूनामुत्कंठयत्यद्यमानसंमकरध्वजः।अत्रोद्दीवकेरोतीत्यर्थयोरुत्कंठयतीतिपदमा
वर्त्यमानंवाक्यद्वयमपिदीपयति।सेयंपदावृत्तिर्दीपकस्यभेदः।उभयावृत्तिर्यथा।जयदेवभुवनभावन
जयभगवन्निखिलवरदनिगमनिधे।जयरुचिरचंद्रशेखरजयमदनांतकजयाद्रिशे।अत्रजयेत्यर्थःश
ब्दश्चावर्त्यमानःसर्ववाक्यानिदीपयति।सेयमुभयावृत्तिर्दीपकस्यभेदः।आवलीयथा।त्वमर्कस्त्वंसोम
स्त्वमसिपवनस्त्वंहुतवहस्त्वमापस्त्वंव्योमत्वमुधरणिरात्मात्वमितिच।परिच्छिन्नामेवंत्वयिपरिणताvि

२०४ अतिगिरंनबिद्मस्तन्नत्वंवयमिहहियत्वंनभवासि।अत्रपूर्वार्द्धेत्वनितिशब्दार्थयोःप्रथमावृत्तिःप्रथमपादः
204 स्यपात्रसीतिक्रिययादीप्यते।ततस्तृतीयपादेत्वयीतिरूपांतरेणायुष्मदर्थआवर्त्यमानःक्रियांतरेणसंब
ध्यते।चतुर्थपादेतुपुनरपितेनैवरूपेणास्यार्थेनभवतिनासंबध्यतइतिसेयंहत्तीनामावृत्तिरावलीतिदीप
कस्यैवभेदोभवति।संपुटेयथा।णवपल्लवेसुलोलइघोलइविदुवेसुचलइमिहरेसु।थवइथवएसुच
लरोवसंतलच्छीअसोअस्स।अत्रनवपल्लवेत्यादीन्यशोकस्येतिलोलनीत्यादीनिवसंतलक्ष्मीरितिप
देइव्यवाचिनीसंपुटक्रमेणमिथःसंबध्यमानेमिथःसंबद्धान्येवदीपयतः।तदेतत्संपुटंनामदीपकस्यभेदः
।रसनायथा।सलिलंविकासिकमलंकमलानिसुगंधिमधुसमृद्धानि।मधुलीनालिकुलाकुलमलि १०४

कुलमपिमधुकरगणेनमिह। अत्ररसनाक्रमेणमिथःसंग्रथितानिसलिलविकाशिकमलामित्यादीनिवा
क्यानि इह स्यंतस्थितेनाधिकरणवाचिनाद्व्यदीपकेनदीप्यते तदेतद्रसनादीपकंनाममादिदीपकेभे
दः। मालायथा। इंमिरणासरणाससीसस्मिणाबिणिस्यारिणीसाईकुमुअवणं। कुमुअवणेण अ
पुलिणंपुलिणेण अ सोहए हंसउलं। अत्रमालाक्रमेणपरस्परग्रथिताःकर्त्तारोहेतवः अशशिप्र
भृतयः शोभंत इतिक्रिययादीप्यते। तदेतन्मालादीपकंनामदीपकस्यभेदः। कः पुनस्सपूर्वस्माद्विशे
षः। पूर्वत्रहिवृत्तिच्छिन्नं रसनायांसर्वत्र रहतुस्वतंत्रमालापुष्पवत्सदंपदेनयुज्यमानंक्रियादिभिः संबध्य
त इतितत्रोयंभिद्यते। चक्रवालंयथा। संग्रामांगणमागतेनभवताचापेसमारोपितेदेवालोककर्णयुययो

२०५ 205 नयेनसहसायद्यत्समासादितं। कोरंडेन शराः शरैररिशिरस्तेनापि भूमंडलं तेन त्वं भवता च कीर्त्तिरतुला कीर्त्या च
लोकत्रयं। अत्र संग्रामांगणमागतेन भवता चापे समारोपित इति भावलक्षणाक्षिप्तस्य भावविशेषस्य द्वितीयपादे का
रकवीप्सयायत्तंक्षेपेणाभिधानं तदेतच्चक्रवालाद्विणेव मालादीपकेन विस्तरवतावेष्टितमिदं चक्रवालं नाम दीप
कस्यभेदः॥ ॥शब्दस्याथ दिवार्थस्य द्वयोरप्यनयोरथं॥ भणानं परिपाद्यायक्रमः स परिकीर्त्तितः। तत्र शब्दपरिपाटिर्द्विधा
।पदतो वाक्यतश्च। तयोराद्या यथा। तस्याः प्रवृद्धलीलाभिरालापस्मितदृष्टिभिः। जीयंते वल्लकीकुंदस्रगिंदीवर
संपदः। अत्रालापस्मितदृष्टिभिः क्रमः। वाक्यतो यथा। इंदुर्मूर्द्धि शिवस्य शैलदुहितुर्वक्त्रेण नखांकः स्तने देयाद्वो मु २०५
दयं द्युपेतदुपमामालंबमानं मिथः। संवादः प्रणवेन यस्य दलता कायेकतायां तयोरुद्दामविचिंतितेन च तहदित्या

तत्स्वरूपेण च। अत्रेंदुमूर्द्धि शिवस्पर्शोल्लद्दुहितुर्वक्रो नस्तांकः स्तन इति चान्यार्थवाचिनौ शब्दसमुदायौ क्र
मेणोर्द्धहारविचिंतितेन च हृदि ध्यातस्वरूपेण चेति वाक्यार्थद्वयवाचिभ्यां शब्दसमुदायाभ्यां संबध्येते। सोयं वाक्य
तः शब्दपरिपाटिः क्रमः। अर्थपरिपाटिर्द्विधा कालतो देशतश्च। तयोराद्या यथा। हस्ते लीलाकमलमलकं बा
लकुंदानुविद्धं नीता लोध्रप्रसवरजसा पांडुतामाननश्रीः। चूडापाशे नवकुरबकं चारु कर्णे शिरीषं सीमंते च त्व
दुपगमजं यत्र नीपं वधूनां। अत्र हस्ते लीलाकमलमलकं बालकुंदानुविद्धमित्याद्यर्थानां शरदादिकालक्र
मेणाभणनं सेयं कालतोर्थपरिपाटिः क्रमः। द्वितीया यथा। पायाद्वो रचितत्रिविक्रमतनुर्देवः सदैत्यांतको
यस्याक्रमिकवर्द्धमानवपुषस्तिग्मद्युतेर्मंडलं। मौलौ रत्नरुचिः क्रतौ परिलसत्ताटंककांतिः क्रमाज्जातं वक्ष

स्मिकौस्तुभाममुरदरेनाभीसरोजोपमं। अत्र त्रिविक्रमतनोर्वैकुंठस्य प्रवृद्धिसमये क्रमेणैव मौलिस्फति वक्षउ
दरलक्षणेषु शारीरदेशेषु भास्वन्मंडलस्य चूडारत्नतालंककौस्तुभनाभ्यंबुजैर्यथापिमोपम्यलाभः सेयं देशतोर्थ
परिपाटिः क्रमः। उभयपरिपाटिर्द्विधा। शब्दप्रधाना। अर्थप्रधाना च। तयोराद्या यथा। पंकअ पंकिवहेलि अकु
वलअ अविअनुदहहिं वालिहिविंबविविहिअ आपत्ति अ ओचंदुणहहिं। करणअणाहरवअणाहितहिलीलाव
इहिणिअत्ति ह्विविउञ्चिहीणारूपआवहूहिं। अत्र पंकजकुवलयबिंबीफलचंद्रमसां करनयनाधरवदनैर्यथा
संख्यपराजयतइति शब्दपरिपाट्येव पंकजानि पंके न्यस्तानि कुवलयानि ह्रदे क्षिप्तानि बिंबं हृतोप्रकीर्णं चंद्रो
नभसि निरस्तइत्याधाराणामुपर्युपरिभावः क्रियाणां च त्यागतारतम्यमित्यर्थपरिपाटिर्न्यग्भवति सेयं शाब्दप्र

धानोभयपरिपाटिःक्रमः। अर्थप्रधानायथा। गंगेदेविदृक्षापुनीहियमुनेमातःपुनर्दर्शनंसंप्रश्नोस्तुपितःप्रयागभ
गवन्न्यग्रोधमांध्यास्यसि। तेहारासिलतावतंसविपुलस्थूलांसवक्षोभुजंपुंभावंभवतामवंतिनगरीनाथंदिदृक्षामहे
। अत्रगंगायमुनाप्रयागन्यग्रोधतत्पुंभावावंतिनगरीनाथलक्षणानामर्थानांमुख्यक्रमेणादेविदृक्षापुनीहिमातः
पुनर्दर्शनंपितःसंप्रश्नोभगवन्मांध्यास्यसीतिमुख्यक्रमेणैवसंभ्रमद्भिःवचोविशेषैरभ्यर्थोभवतामेवपुंभावम
वंतिनगरीनाथंदिदृक्षामहइतियेयमभ्यर्थनाभंगिस्त्वार्थपरिपाटिकृतातस्यांचगंगेयमुनेप्रयगन्यग्रोधेतिहारा
सिलतावतंसविपुलवक्षस्थूलांसेतिचशब्दपरिपाटीपरस्परमुपमानोपमेयभूतेन्यभवतः। त्येयमर्थप्रधानो
भयपरिपाटिःक्रमः। निषंयदुक्तिभंगिर्यावमरोयःसमस्तरिभिः। निराकांक्षोथमाकांक्षःपर्यायइतिगीयते। ते

२०७ पुनराकांक्षमिषं यथा। मया विमुक्ता बहिरेव वल्लकी व्रजेद्वयस्यायकरौश्वसार्द्रतां। द्रुतं तदेनां करवैनिचो
207 लके कयाचिदेवं मिषतो विनिर्यये। अत्र कयाचिदेवं मिषतो विनिर्ययइत्यस्फुटकीभिधानेनाकांक्षा निराकृते
र्निराकांक्षमेतन्मिषं नाम पर्यायभेदः। तदेव साकांक्षं यथा। दशत्यसौ परभृतः सहकारस्य मंजरी। तमहं वारयिष्या
मि युवाभ्यां स्वैरमास्यतां। अत्र कयाचिदेवं मिषतो विनिर्ययेइतिवदुदक्तानभिधानात्साकांक्षमेतन्मिषनाम
पर्यायस्य भेदः। निराकांक्षोक्तिभंगिर्यथा। राजन्राजसुतान पाठयति मां देव्योपि तूष्णीं स्थिताः कुब्जे भोज
य मां कुमारकुशलं नाद्याप्युके भुज्यते। इत्थं नाथ शुकस्तवारिभवने मुक्तोध्वगैः पंजराच्चित्रस्थानवलोक्य २०७
वेश्मवलभीष्वेकैकमाभाषते। अत्रानयोक्तिभंग्याशून्यीकृतारिनगरस्य नरपतेः कश्चित्प्रतापं वर्णयति

तत्र वाक्यस्य परिपूर्णत्वेन निराकांक्षत्वान्निराकांक्षेयमुक्तिभंगिः। साकांक्षा यथा। शांसैवोल्ककपालदामज
गतां पत्युर्यदीयांलिपिंकापिंकापिगणाः पठंति पदशो नातिप्रसिद्धाक्षरां। विश्वंस्त्रक्ष्यतिवक्ष्यतिक्षितिमपा
लदामजगतां पत्युर्यदीयां लिपिंकापिंकापिगणाः पठंति पदशो नातिप्रसिद्धाक्षरां। विश्वं स्त्रक्ष्यतिवक्ष्यति
क्षितिमपामीशिष्यते शिष्यते नागेरागिषुरंस्यतेऽत्स्यति जगन्निर्वेक्ष्यति धामिति। अत्रानयोक्तिभंग्यात्र
लाघ्यस्तसमयेप्पनस्तमितस्य भगवतो महेश्वरस्य प्रभावो वर्णितेतत्र च यदीयां लिपिंकापिंकापिगणाः
पठंति पदशो नातिप्रसिद्धाक्षरामित्यमेनैव वाक्येस्मिन्नाकांक्षो स्थाप्यते। सा च विश्वं स्त्रक्ष्यतीत्यस्मि
न्नीदृशी ब्रह्मणां च चतुर्युगसहस्रांते दिनमेकमिति मानेनेषवर्षशतजीवी विश्वंस्त्रक्ष्यति ब्रह्मेति

१०८ 208 ज्ञाप्यते। कपालं चास्य भगवतो भूषणं भविष्यतीति वक्ष्यति क्षितिमित्यस्मिन्नीदृशी ब्रह्मणामयं वर्षशते
नैकं दिनमिति मानेनैष पुरुषायुषजीवी क्षितिं वक्ष्यति विष्णुरिति ज्ञाप्यते कपालं चास्य भगवतो भूषा भविष्य
तीति एवमपामीशिष्यत इत्यादिषु वरुणवायुकामयमेन्द्रविषयत्वेन योजनीयमेवमनेकप्रकारेण ब्रह्मादी
नां साक्षादनभिधानेन साकांक्षो क्रिमिभिः अवसरो निराकांक्षो यथा। अथ तैः पारदे विनाक्षरैर्हृदये दि
ग्धशरैरिवार्दितः। रतिमप्युपपन्नुमातुरं मधुरात्मा न मदर्शयत्पुरः। अत्र। क्व तु ते हृदयंगमः सखा कुसुमा
यो जितकार्मुको मधुः। न खलूग्ररुषा पिनाकिना गमितः सोपि सुहृद्गतां गतिं। इति पाभितैः पारदे वि १०८
नाक्षराणि तैराकृष्टहृदयस्य मधोर्पायमात्मदर्शनायप्रस्तावः सोयं न किंच नकाशते नीति निराकांक्षोय

मवसरः पर्यायस्य भेदः। सा कांक्षेय यथा। अज्ज विबालो दामो अरोत्ति इ अजं पि एज्ज सो आए। कराह मुहपेसि अच्छं
णिदु अहसि अंव अवहूणो। अत्राद्यापि बालो दामोदर इति कृतप्रस्तावेन स्वकृष्णस्य वक्रे विन्यस्तलोचनया तरु
हस्य वेदिन्या व्रजवधूमतल्लिकया पायदेतन्निभृतं हसितं तन्नवां बाबालं त्वां ब्रूते त्वं तु मा ह शीमि र्ति भुवनविदग्धाभि
र्दिन्या व्रजवधूमतल्लिकया पायेदेतन्निभृतं हसितं तन्नवां बानिशं यमुनाकुंजोदरेषु विहरसीत्यादिनार्थे जाते न सा कां
क्षमिति सा कांक्षेय मवसरः पर्यायस्य भेदः॥ ॥विवक्षाया विशेषस्य लोकसीमानिवर्त्तिनी। असावतिशयोक्तिः
स्यादलंकारोत्तमा च सा। सा च प्रायो गुणानां च क्रियाणां चोपकल्पते। नहि द्रव्यस्य जातेर्वा भवत्यतिशयः क्वचि
त्। प्रभावातिशयो यश्च यश्चानुभवनात्मकः। अन्योन्यातिशयो यश्च तेपि नातिशयात्पृथक्। अलंकारान्तराणा

२०९ 209 मप्येकमाहुः परायणं। वागीशमहिता सूक्तिमिमामतिशयाह्वयां। तत्र गुणातिशयेन महत्त्वातिशयो यथा। अहो
विशालं भूपाल भुवनत्रितयोदरं। माति मातुमशक्तोपि यशोराशिर्यदत्र ते। अत्रैवं यशोराशेरशक्यमानस्याप्यतिश
योक्त्या विशेषविवक्षायेन त्रिभुवनोदरमपि संकीर्णमाशंक्यते। सोयं महत्त्वातिशयो नामातिशयभेदः। तनुत्वाति
शयो यथा। स्तनयोर्जघनस्यापि मध्ये मध्यं प्रिये तव। अस्ति नास्तीति संदेहो न मेद्यापि निवर्त्तते। अत्रैवं मध्य
स्य लोकसीमातिक्रमेणानावतिशयविवक्षायेन तदस्ति नास्तीति वा संदिह्यते। सोयं तनुत्वातिशयो नामातिश
यभेदः। कांत्यतिशयो यथा। मल्लिकामालभारिण्यः सर्वांगीणार्द्रचंदनाः। क्षौमवत्यो न लक्ष्यंते ज्योत्स्नायामभि १०९
भिसारिकाः। अत्रैवं चंद्रालोकस्य लोकसीमातिक्रमेण बाहुल्योत्कर्षविवक्षायेन तस्मिन्समानाभिहारेण

मिसारिकाय्यपिनलक्ष्यंते सोयं कांत्यतिशये। नामातिशयभेदः। अथास्यपिहितात्को विशेषः। उच्यते। पिहितेचं
द्रातपस्योत्कर्षेणाभिसारिकातिरस्कारो विवक्ष्यते। इह त्वभिसारिकातिरस्कारेण चंद्रातपोत्कर्ष इति। प्रभावाति
शयो यथा। तं दइआहिसाणं जं म्मि विअग्गाम्मि णाहवेणाणाणि मिअं। सो आपरिगहे णवऊढेति णाविणिरं
तरं रोमंचो। अत्र दयिताभिज्ञानस्य योयं रोमांचक्रिया विशेषः स क्रियातिशयस्यैव भेदः। प्रभावातिशयस्तूच्यते।
अनुभावातिशयो यथा। विमलिअरसाअलेण वि विसहरवइणा अइद्दुमूलछेअं। अप्पं तं तुंगसिहरं तिहुअ
णहरणेण पव्वड्ढिएण वि हरिणा। अत्र रसातलमपि महूताशेषेणापि चतस्य मूलेन दृष्टं त्रिभुवनमप्युल्लंघयेयता ह
रिणापि न तुंगशिखराणि आमानीति यदेतल्लोकसीमातिक्रमेण विशेषव्यवस्थापापर्वतानुभावभेणानं सोयम

२१० 210 नुभूयमाहात्म्यातिशयस्यैवमेदोनुभावातिशयउच्यते। अन्योन्यातिशयो यथा। रणदुज्जओ दहमुहो सुराअ
वस्सा च्चातिदुज्जणास्सइमो। पडइ च्चरणस्योत्रिफुड विहीसणेणसुडिआहरंणीससिअं। अत्र दशास्यः समरे
नजीयते सुराश्चामरत्वान्नवध्यंते। तयोश्च परस्परंसंघट्टक्रियातिशयात्त्रिभुवनमपि क्षयंयास्यतीति येयमन्योन्या
तिक्रियातिशयभणना लोकसीमातिक्रमेण विशेषविवक्षा। सोयंक्रियातिशयो नामातिशय एवान्योन्यातिश
यउच्यते॥ ॥श्लेषोनेकार्थकथनंपदैरेकैकैर्न कथ्यते। पदक्रियाकारकैः स्याच्छ्लिष्टाभिन्नैः स षड्विधः। तेषु भिन्न
पदो यथा। दोषाकरेण संबंध्नन्नक्षत्रपथवर्त्तिना। राज्ञा प्रदोषो मामित्थमप्रियं किंन बाधते। अत्र प्रदोषोऽरा ११०
त्रेः प्रथमो यामः किमिति प्रियारहितंमां न बाधते इत्युक्ते युक्तिमाह। इत्थमनुभूयमानेन प्रकारेण राज्ञा संबध्न

न्कीदृशेन दोषाकारेण न क्षत्रपथवर्त्तिनेति। यो हि दोषाणामाकरेण राजमार्गातिगामिना च राज्ञा प्रकृष्टदोषः सं
बध्यते सोऽप्रियमवश्यं बाधते एवं तदत्र पूर्वस्मिन्प्राकरणिकेऽर्थे द्वितीयोऽर्थोऽप्राकरणिकः पदभेदेनोपश्लिष्यमा
णो भिन्नपदश्लेषापदेशमासादयति। अभिन्नपदो यथा। असावुदयमारूढः कांतिमान्रक्तमंडलः। राजा ह
रति लोकस्य हृदयं मृदुभिः करैः। अत्रायमुदीयमानश्चंद्रमाः लोकस्य हृदयं हरतीत्युक्तेः युक्तिमाह। राजानुरक्त
मंडलः उदयी मृदुकरः कांतिमानिति यो ह्येवंभूतो राजा सोऽवश्यं लोकस्य हृदयं हरतीत्युक्तेः युक्तिमाह। राजानुरक्त
ीभवति। अत्रापि चैप्राकरणिकेऽर्थे प्राकरणिक उपश्लिष्यमाणः पदानामभेदेनाभिन्नपदश्लेषो भवति। भिन्नक्रि
यो यथा। मधुरा रागवर्द्धिन्यः कोमलाः कोकिलागिरः। आकर्ण्यंते मदकलाः श्लिष्यंते चासितेक्षणाः। अत्राकर्ण्यंते

२११ ष्लिष्यंते चेति क्रियापदद्वितयस्य प्राधान्यतः समुच्चये नोपात्तस्य मधुरा इत्यादिभिः श्लिष्टपदैः कोकिला गिर इत्यसि
211 तेक्षणा इति वा विशेष्यैकपदवर्ज्जं पर्यायतः संबंधो भवति तद्यथा। आकर्ण्यंते काः कोकिलागिरः कीदृश्यः मधुराः रा
गवर्द्धिन्यः कोमलाः पुनरपि किं भूताः आसितेक्षणाः आसिते उपवेशिते अंतः प्रमोदानुभावादीक्षणे याभिस्ता
स्तथा। सर्वोपि हि मधुरं शब्दमाकर्णयन्निश्चलाक्षो भवति॥ श्लिष्यंते च काः असितेक्षणाः हरिणचक्षुषः किं
भूता मदकलाः कोकिलगिरः कोमलाः रागवर्द्धिन्यो मधुरा इति सोयं द्वयोर्विभिन्नक्रिययोर्भिन्नार्थं च रूपि
णां पदार्थानामुपश्लेषो भिन्नक्रियः श्लेष उच्यते। अभिन्नक्रिययोर्यथा। स्वभावमधुराः स्निग्धाः शंसंत्यो राग २११
मुल्बणं। दृशो दूत्यश्च कर्षंति कांताभिः प्रेषिताः प्रियान्। अत्र कर्षंतीत्येतस्याः क्रियाया दृशां दूतीनां च श्लिष्ट

पदत्वेनावेशादयमभिन्नक्रियो नाम श्लेषविशेषः। प्रथमयोरस्य वा को विशेष इति चेत् तत्रैकस्यैव प्राकरणि-
कत्वं अत्र तु द्वयोरपीत्ययं च भिन्नकारको भवति। भिन्नकारककारको यथा। गतिर्वेणी च नागेन वपुरूरू च वरम्भया। ओष्ठौ पा-
णी प्रवालैश्च तस्यास्तुल्यत्वमाययुः। अत्रैकस्मिन्नक्षे धर्मधर्मिणोरभेदोपचारान्नागगतिर्गृह्यते। तत्र गतेर्वेण्याश्च ना-
गेन हस्तिना अहिना च तुल्यत्वं वपुरूर्वोश्च रम्भया कदल्या अप्सरोभिश्च तुल्यत्वं। ओष्ठयोः पाण्योश्च प्रवाले विद्रुमेर्न-
वपल्लवैश्च वर्णनीययोः श्लेषप्रभावाल्लभ्यते सोऽयमनेककर्तृकत्वाद्भिन्नकारक इति श्लेषो भवति। अभिन्नकारको रको
यथा। कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी। याति विश्वसनीयत्वं कस्य ते कलभाषिणि। अत्र हे कलभाषिणि
कस्य ते दृष्टिर्विश्वास्या भवतीत्युक्तेर्युक्तिमाह। कृष्णार्जुनानुरक्तापि कर्णावलम्बिनीति। या हि कृष्णार्जुनेनानुर-

२१२ ज्यतिकयंमाकर्णपक्षपातिनीभवति।यांचैवमुभयगतातस्यांकोविशेषमितिसचायमेककर्तृकत्वादभिन्नकारक
212 इतिश्लेषोभवति॥ ॥स्वाभिप्रायस्यकथनंपरिवाप्यन्यभावना।अन्यापदेशोव्यपस्तुत्रिविधंभाविकंविदुः।मते
चास्माकमुद्देशोविद्यतेनैवभाविकात्।व्यक्ताव्यक्तोभयाख्याभिस्त्रिविधःसोपिकथ्यते॥तत्रभाविकंविदुः।मुभेद
पुस्वाभिप्रायकथनंयथा।णाविज्जुरद्दुयोज्जिअआदिट्ठमिजम्मिमिउरिआजस्यणअघाहारओघिप्परआ
हसत्तएविछुहरा।अहिसिंजएजस्यणसोवंअंसिआतमेकहहुमाणअंजरमेरछड्डजीअअंअ।अत्रभूमेदासं
भाषणाप्रियतमावक्षेपणारूपान्यस्यनभिमतप्रतिपादनरूपस्याभिप्रायस्यकथितत्वादिदंस्वाभिप्रायकथनंनाम
भाविकं।अन्यभावनायथा।दंसणावलिअट्ठकंविधणांदीहरंसुपरिणाहं।होइइघरेसाहीणांमुसलंधसाणामहि ११२

लाणा। अत्र मेद्रभावनया मुसलरूपस्योक्तत्वादिदमन्यभावनामिथ्यात्वं भाविकं। अन्यापदेशो यथा। आसाइअं
णाएण जत्तिअं विअविहीणओ रमसु वसह एण्हिं। रक्खिज्जइ गहवइच्छेत्तं। अत्र परक्षेत्रस्य घस्मरवृषनिवारणा
पदेशेन विरणत्वरित्तातउपपतिर्वार्यते। तदिदमन्यापदेशाख्यं भाविकं। उद्भेदे बुध्यक्तो यथा। मंते सिमहुमहपण
अं संदाणमिति असेसपाअवराअणं। आजन्तु सुहु सहावं संभावेन्तु रणाहजाव अमलोअं। अत्र मायाविनो
महेन्द्रस्याभिप्रायः सत्यकेन व्यक्तमेवोद्भिन्न इति व्यक्तो युमुद्भेदः। अव्यक्तो यथा। निःशेषच्युतचंदनं स्तनतटं नि
र्मृष्टरागोधरो नेत्रे दूरमनंजने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि दूति बांधवजनस्याज्ञातपीडागमा वापीं
स्नातुमितो गतासि न पुनस्तस्याधमस्यांतिकं॥ अत्र वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यांतिकमित्या

२१३ 213 क्षेपवताप्रकृतोदाहरणोनयद्यपिहस्त्यादुश्लेषितंनिर्भिन्नं।तथापिनपूर्ववद्व्यक्तमितिसव्यक्तोयमुद्भेदः।उभयरूपोयथा।
अम्लानोसलकोमलेसविदृशोनीलांजनेनांचितकर्णेस्फुरणाच्चगंडफलकेसंवेह्नितःपांडिमा।श्वासाःसंतुचकं
दुकम्भ्रमिभुवः किंतुप्रभावाहिनामंगानांकृशिमानमुत्कटममुंकोनामनोलक्षते।अत्रदृशोम्लानतागंडयोःपांडु
रत्वंश्वासानांदैर्घ्यमिसुलंकठाचिकृवायपोयमविनयवसानीलांजनादिप्रयोगस्यनत्वाभ्युपगमेप्यंगानांकृशि
मानमुत्कटममुंकोनामनोलक्षयतइतिपोयंसखीव्याहारस्तेनतदभिप्रायःउद्भिन्नोःतुद्भिन्नश्चभवतीत्ययमुभय
रूपोयमुद्भेदः।तेमीत्रयोप्युद्भेदाभाविकाल्पमियंते॥ ॥संसृष्टिरितिविज्ञेयासर्वालंकारसंकरैः।सातुव्यक्तातथा ११३
व्यक्तोव्यक्ताव्यक्तेतिचत्रिधा।तिलतंडुलवद्व्यक्ताछायादर्शवदेवच।अव्यक्ताक्षीरजलवत्पांशुपानीयवच्चसा।

व्यक्ताव्यक्ता च संसृष्टिर्नरसिंहवदिष्यते। चित्रवर्णवदस्मिन्नानालंकारसंकरो। व्यक्तातिलतंडुलवद्यथा। पि
नष्टीव तरंगाग्रैरुदधिः फेनचंदनं। तदादायकरैरिंदुर्लिंपतीव दिगंगनाः। अत्रोत्प्रेक्षाद्वयं रूपकद्वयं च तिलतंडुलव
त्संकीर्यते। व्यक्तैव छायादर्शवद्यथा। निर्मलेंदु नभो रेजे विकजाब्जं बभौ सरः। परं पर्यश्रु वदनौ मम्लतुर्भ्रातरा
वुभौ। अत्रादर्शच्छायेवेहेत्वलंकारो रामलक्ष्मणमुखयोरिंदुपद्मोपमेयेन सदृशासदृशव्यतिरेको दृश्यते। अव्यक्ता
क्षीरजलवद्यथा। क्षीरक्षालितचंद्रेव नीलीधौतांबरेव च। टंकोल्लिखितसूर्येव वसंतश्रीरदृश्यत। अत्रोपमोत्प्रेक्षे क्षी
रनीरवन्मिश्रे संसृष्टे न व्यज्येते। अव्यक्तैव पांसूदकवद्यथा। कृष्णार्जुनानुरक्तापि दृष्टिः कर्णावलंबिनी। याति विश्व
सनीयत्वं कस्य ते कलभाषिणि। अत्र पांसूदकयोरिव मृतपिंडश्लेषविरोधयोरव्यक्तयोरेव व्याजस्तुतावंगभावो

२१४ 214 गम्यते। व्यक्ताव्यक्ता नरसिंहवद्यथा। रजोभिस्तुरगोत्कीर्णैर्मेघैश्च घनसंनिभैः। भुवस्तलमिव व्योम कुर्वन्व्योमेव भू
तलं। अत्रनरसिंहजाताविवसिंहनरशरीरभागयोः परिह्नुत्यलंकारहेतूपमयोरंगभावोव्यक्ताव्यक्तरूपः परिस्फुरन्नु
पलभ्यते। व्यक्ताव्यक्तैवचित्रवर्णवद्यथा। मयूरारावमुखरांप्रावृषंसतडिल्लतां। महाटवीमिवोल्लंघ्यतोयानिमुमुचु
र्घनाः। अत्रपटावयवस्यानान्नीलादीनामिवपटावयव्याश्रितेचित्रवर्णेश्लेषरूपकोपमार्थश्लेषाणांपदपदार्था
श्रयाणांशरद्वर्णनवाक्याश्रयिणिसमाध्यलंकारेव्यक्ताव्यक्तरूपोंगांगिभावः प्रतीयते॥ ॥चतुर्विंशतिरित्येताः क्रमे
णोभयसंश्रयाः। काव्यालंकृतयः प्रोक्तायथावदुपमादयः॥ ॥छ॥२४॥ इतिश्रीमहाराजाधिराजश्रीभोजदेव
विरचितेसरस्वतीकंठाभरणेउभयालंकारविवेचनोनामचतुर्थः परिच्छेदः॥४॥ रसोभिमानोहंकारः शृंगारइति ११४

=आत्मसम्यग्गुणोद्भूतेः। सत्वगुणोद्भूतेः।१०= रसोक्ती रत्नभावरत्नादि=

गीयते। योर्थस्तस्यान्वयात्काव्यं कमनीयत्वमश्नुते। विशिष्टादृष्टजन्मायं जन्मिनामंतरात्मसु। आत्मसंम्यग्गुणो
द्भूतेरेको हेतुः प्रकाशते। श्रृंगारी चेत्कविः काव्ये जातं रसमयं जगत्। स एव चेदश्रृंगारी नीरसं सर्वमेव तत्। पश्य
ति स्त्रीति वाक्ये हि न रसः प्रतिभासते। विलोकयति कांतेति व्यक्तमेव प्रतीयते। कन्ये कामयमानं मां त्वं न कामयसे क
थं। इति ग्राम्योयमर्थात्मा वैरस्यायैव कल्पते। कामं कंदर्पचांडालो मयि वामाक्षि निर्दयः। त्वयि निर्मत्सरो दिष्ट्य
ग्राम्योर्थो रसावहः। नवोर्थः सूक्तिरग्राम्या श्रव्यो बंधः स्फुटाश्रुतिः। अलौकिकार्थयुक्तिश्च रसमाहर्तुमीश
ते। वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयं। सर्वानुग्राहिणी तासु रसोक्तिं प्रतिजानते। भावो जन्मानुबंधो
थ निष्पत्तिः पुष्टिसंकरौ। ह्रासाभासौ शमः शेषा विशेषाः परिपोषवान्। विप्रलंभोथ संभोगस्तच्चेशस्तसरीष्टयः

२१५ ।निरुक्तयः प्रकीर्णानि प्रेमाणः प्रेमपुष्टयः ।नायिकानायकगुणाः पाकाद्याः प्रेमभक्तयः ।नानालंकारसंसृष्टेः प्रका
राश्चैसोक्तयः ।चतुर्विंशतिरित्युक्तारसान्वयविभूतयः ।स्वरूपमासां यो वेद स काव्यं कर्त्तुमर्हति ।आलंबनविभावे
215 भ्यः स्वेभ्यः स्वेभ्यः समुन्मिषन् ।रसो रत्यादिरूपेण भावस्त्वभिधीयते ॥ रतिर्हासश्च शोकश्च क्रोधोत्साहो भयं तथा
।जुगुप्सा विस्मयश्चाष्टौ स्थायिभावाः प्रकीर्त्तिताः ।स्तंभस्तनूरुहोद्भेदो गद्गदः स्वेदवेपथू ।वैवर्ण्यमश्रुप्रलया
वित्यष्टौ सात्विका मताः ।स्मृतिर्वितर्कश्चोत्कंठा चिंता चपलता मतिः ।गर्वः स्नेहो धृतिर्व्रीडा ऽवहित्थं मूढता मदः
।हर्षामर्षावसूयेर्ष्या विषादो दैन्यमुग्रता ।त्रासः शंकाग्रदो ग्लानिरुन्मादः संभ्रमः श्रमः ॥ निर्वेदो जाड्यमालसं २१५
निद्रा सुप्तं प्रबुद्धता ।इति भावास्त्रयस्त्रिंशद्विज्ञेया व्यभिचारिणः ।चिरं चित्ते वतिष्ठंते संबध्यंतेनुबंधिभिः ।रस

तं प्रतिपद्यंते प्रकृष्टाः स्थायिनोत्र ते। रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते। निर्वर्तयेस्य तद्योगात्प्रभवंतीति सात्वि
काः। विशेषेणाभितः काये स्थायिनं चारयंति ये। अनुभावादिहेतुत्वान्नवदंति व्यभिचारिणः। जनित्वा येन जायंते ते
थवा व्यभिचारिणः। स्मरस्यादयो हि प्रमादो भवंति न भवंति च। एतो संचारिणः सर्वान्न गर्वस्तेहोधृतिं मतिं। स्थायिस्त्रे
वोद्धृतप्रेयः शांतोदात्तेषु जानते। संस्कारपाटवादिभ्योनुभावं वा निजाश्रये। संचारिणं वाजनयन्सात्विकं वा समजा
यते। उद्दीपन विभावेभ्यः स्मृति हेतोपटीयसि। अनुबंधोनुभावादेरनुबंधोस्य कथ्यते। विभावस्यानुभावस्य सात्वि
क व्यभिचारिणोः। संयोगे तस्य निष्पत्तिमात्रे निष्पत्तिरिष्यते। विषयाश्रय संस्कारगु णप्रकृति पाटवैः
दीपनातिशय्यैश्चास्य प्रकर्षः पुष्टिरुच्यते। तुल्यकालबलोत्पत्ति हेतो भावांतरोदयो दये। संसर्गस्तस्य यस्तेन

=अन्यस्त्रिमनस्कां वा रागोऽन्यरागः तस्मात् अपश्यन्तीयास्य स्यात् अन्यस्येत्यादिना डुगागमः। अन्यरागादिति पाठे षष्ठीसमासः अषष्ठीन्यस्येति निषेधात् डुगभावः।१=अस्यरसस्य।४=रसादेः।५=हेतोः।५=

११६ संकरः स निगद्यते।रसांतरतिरस्कारादन्यद्रागाच्च तस्य यः।भवस्यपचयो हेतुस्तद्ध्रासं तं प्रचक्षते।हीनपात्रेषु तिर्यक्षु नाय
216 कप्रतियोगिषु।गोलब्धेच वपदार्थेषु तमाभासं विजानते।बलवत्स्वपजातेषु प्रतिकूलेषु हेतुषु।सर्वात्मना समुच्छेदः प्रश
मस्तस्य वर्ण्यते।आश्रयात्मकतेर्वापि संस्कारस्थैर्यतोपि वा।योऽस्यास्वंतमविच्छेदः सशेष इति शब्द्यते।शृंगाराद्या रसा
ये च ये च शांताद्भुतादयः।ये च रत्यादिभेदास्तान्विशेषानस्य मन्वते।विभावश्चानुभावश्च संचारी चाश्रयश्च यः।ये च
लीलादयो यूनां परिपोषः स कीर्त्यते।आश्रयो यस्य रत्यादिः प्रेमादेरुपजायते।विषयो यत्र यो धादौ सोऽस्य जन्माधिग
च्छति।आलंबनविभावः स ज्ञानकारणमुच्यते।तेनादरादिरूपेण संस्कारस्तेन जायते।आहतः पटुरभ्यस्त आ ११६
श्रयादेर्गुणेन सः।तत्प्रबोधाय माल्यर्तुचंदनेंदूदयादयः।उद्दीपनविभावास्ते मतेः स्मारितवांछति।हृष्टिप्रय

[redacted]

ततेवैतिमन्यतेवक्रिचेष्टेतातिनुभावास्तदायेस्तुःस्वेदरोमोद्गमादयः।हर्षामर्षादयोयेचज्ञेयाःसंचारिणोत्रते।स्मृती
च्छापलजन्मानोमनोवाक्कायसंश्रयाः।विलासाद्येवस्त्रीणांज्ञेयालीलादयस्तुते।लीलाविलासोविच्छित्तिर्विभ्र
मःकिलकिंचितं।मोट्टायितंकुट्टमितंविब्बोकोललितंतथा।विहृतंक्रीडितंकेलिरितिस्त्रीणांस्वभावजाः।हेलाहा
वादयश्चान्येज्ञेयाःस्त्रीपुंसयोरपि।उपसंख्यानमेतेषामनुभावेषुमन्यते।पश्चाज्ज्ञावानुभूतिभ्यांस्मरणाद्यनुभाव
वत्।स्मरस्यास्योनुभावाश्चभावाःसंचारिणश्चये।नाट्येनुक्रियमाणास्तेनटैरभिनयाःस्मृताः।भावोयदारतिर्नाम
प्रकर्षमधिगच्छति।नाधिगच्छतिचाभीष्टंविप्रलंभस्तदोच्यते।पूर्वानुरागोमानश्चप्रवासःकरुणश्चसः।पुरुष
स्त्रीप्रकांडेषुचतुःकांडःप्रकाश्यते।प्रागसंकेतयोर्यूनोरभिलाषःप्रवर्तते।संकल्परमणीयोऽनुरागःसप्राच्यउ

२१७ 217

च्यते। अहेरिव गतिः प्रेम्णः स्वभावकुटिलेति सः। अहेतोर्मतिनेत्सुकेहेतोर्वा मान उच्यते। देशांतरादिभिर्यूनो
र्व्यवधानं चिरायपयत। नवेनुरागे प्रौढे वा प्रवासः सोभिधीयते। लोकांतरगते यूनि वल्लभे वल्लभा यदा। भृशं दुःखा
यते दीनः करुणः स तदोच्यते। रतिरेव हृष्टः संप्राप्तो पुष्टः संभोग उच्यते। सोपि पूर्वानुरागादेरनंतर्या चतुर्वि
धः। न विना विप्रलंभेन संभोगः पुष्टिमश्नुते। कषायिते हि वस्त्रादौ भूयान्रागो नुबध्यते। स्त्रीपुंसयो विप्रलं
भे वैचिसाकल्पनादयः। चेष्टाविशेषाः संभोगे चुंबनालिंगनादयः। विप्रलंभे भियोगाद्यैः संभोगे साध्वसादिभिः। मि
थः परीक्षा याः प्रेम्णो निर्दिष्टास्ताः परीष्टयः। विप्रलंभादिशब्दानां लोकसिद्धेषु वस्तुषु। प्रकृत्यादिविभागे
न विनिवेशा निरुक्तयः। संक्षस्य विप्रलंभार्थान्निरृधिंवंच्योः प्रलंभने। इत्यादिज्ञापकात्स्त्येयः प्रपूर्वो वंच २१७

नेत्रभिः।अप्रदानंचप्रतिश्रुत्यविसंवादनमेवच।कालस्यहरणंचाहुःअप्रदानंचवंचनं।पूर्वानुरागपूर्वेषुविप्रलं
भेषुतत्क्रमात्।विशेषद्योतकेनेहत्वुपसर्गेणस्तूच्यते।प्रतिश्रवोहिपूर्वानुरागवक्रेक्षितादिभिः।अभीष्टालिं
गनादीनामप्रदानंक्रीभयादिभिः।मानेनिवारणंतेषांविसंवादनमुच्यते।अयथावत्प्रदानंवाव्यलीकस्म
रणादिभिः॥प्रवासेकालहरणंव्यक्रमेषांप्रतीयते।प्रोष्यागतेष्विहैतानिकांताःकांतेषुयुंजते।अप्रदा
नंपुनस्तेषांकरुणेकोनमन्यते।स्वयंदत्तानिहिविधिस्तानितत्रापकर्षति।प्रलंभेस्यतत्रयदिवावंचनामा
त्रवाचिनि।विनासमासेचतुरश्चतुरोर्थान्प्रयुंजते।विविधश्चविरुद्धस्वव्याविद्धश्चक्रमेणसः।विनि
षिद्धश्चपूर्वानुरागादिषुविभज्यते।पूर्वानुरागेविविधंवंचनंव्रीडितादिभिः।मानेविरुद्धंतत्राहुःपुन

रीर्ष्यायितादिभिः। व्याविद्धं दीर्घकालत्वात्प्रवासेन तत्प्रतीयते। विनिषिद्धं तु करुणे करुणत्वेन गीयते। रागो ऽनुस
हपश्चाद्यो ऽनुरूपो ऽनुगतो ऽपि वा। यूनोरपूर्वः पूर्वानुरागशब्देन शब्द्यते। रज्यते रंज्यते वापि रागः कारणभावयोः। घ
ञान्यकारके भावे न लोपेन निपात्यते। मान्यते ऽप्ययमायेन यं प्रियत्वेन मन्यते। मनुते वापि मिमीते वा प्रेममानः स
कथ्यते। महाभाष्यकृतः को ऽसावनुमान इति स्मृतेः। ल्युडंतो ऽपि न पुंल्लिंगो मानशब्दः प्रदुष्यति। यत्रांगनासु वा
नश्च वसते नैव संति च। स प्रवासः प्रशब्देन प्रतीपार्थेन कथ्यते। चिंतोत्कंठादिभिश्चेतो भृशं वासयतीह यः। प्र
वासयति वा यूनः स प्रवासो निरुच्यते। प्रपूर्वको वसिर्ज्ञेयः कारितांतः प्रमापणे। तूष्णीं प्रवासयेदेनमिति
हृद्यानुशासनात्। अभूतोत्पादनायां कृञ् दृष्टः कुरु घटं यथा। दृष्टश्चोच्चारणे चोरं कारमाक्रोशतीतिवत्। दृष्टो २१८

=असमर्थचतुष्टयानुगमनेनकरुणभाषणमाह। कर्षेति। तत्रप्रथमंकुतनमस्यप्रोसादनार्थंविलापंकुतत इत्युच्यते। एवंतु ननुमोर्यथायथमूह्यं॥१॥

ऽवस्थापनेऽश्मानमितः कुरुयथोच्यते। अभ्यंजनेपिचयथापार्श्वेमेसर्पिषाकुरु। मूर्छाविलापेकुरुतेकुरुतेसाह
सेमनः। करोतिदुःखंचित्तेनयोसौकरुणउच्यते। भुजिः पालनकौटिल्याभ्यवहारानुभूतिषु। भुनक्तिभुंक्ते। भुंक्तेन्नं
भुंक्तेसुखमितीष्यते। समीचीनार्थसंपृक्तोद्वितोघञ्प्रत्ययेसति। भावेवाकारकेवापिरूपंसंभोगइष्यते। सपालना
र्थः पूर्वानुरागानंतरउच्यते। उत्सन्नाहिरतिस्तस्मिन्नानुकूल्येनपाल्यते। समानानंतरंप्राप्तः कौटिल्यार्थेविगाह
ते। स्वतोपिकुटिलंप्रेमकिमुमानान्वयेसति। प्रवासानंतरेतस्याभ्यवहारार्थतेष्यते। तत्रक्षुपोषितेरत्नमिवनि
विश्यतेरतिः। करुणानंतरगतोनुभवार्थः सकथ्यते। विश्रंभवद्भिरस्मिन्हिसुखमेवानुभूयते। यद्वाभो
गइत्यस्यसंप्रयोगार्थवाचिनः। समासमासेचतुरश्चतुरोर्थान्प्रचक्षते। ससंक्षिप्तोथसंकीर्णः संपूर्णः स

=चत्वारोविशेषाःसमुपागतइतिपाठांतरं॥१॥

२१९ म्यगृह्णिमान्। अनंतरोपदिष्टेषु संभोगेषूपपद्यते। नवेहि संगमे शायो युवानः साध्वसादिभिः। संक्षिप्तानेव रत्यर्थमुपच
219 रान्प्रयुंजते। मानस्यानंतरे तेषां व्यलीकस्मरणादिभिः। रोषशेषानुसंधानात्संकरः केन वार्यते। संपूर्णः पूर्णका
मानां कामिनां प्रोष्य संगमे। उत्कंठितानां भूयिष्ठमुपभोगः प्रवर्त्तते। प्रत्यागते प्रियत्रेषा रतिपुष्टिः प्रिये जने। मा
कि माव राघेनेयूनां तत्रैव मृतजीविते। पूर्वानुरागपूर्वाणां व्युत्पत्तिर्भिरुदाहृताः। अनंतराणां सर्वेषां तत्समासे
निरुक्तयः। वृत्तिस्तत्राजहत्स्वार्थाजहत्स्वार्थापि वर्त्तताम्। प्रधानमनुपस्कृत्य न तदर्थौ निवर्त्तते प्रथमानं
तरे हृत्ते रजहत्स्वार्थतेष्यते। नात्यंतमजहत्स्वार्थतां मानानंतरे विदुः। प्रवासानंतरे त्वीषदजहत्स्वार्थतेष्यते।
कहर्णार्थस्य गंधोपि नास्त्येव तदनंतरे। अष्टमीचंद्रकः कुंदचतुर्थ्य स्तुवसंतकः। आंदोलनचतुर्थ्येकशा २१९

ल्मलीमदनोत्सवः।उदकक्ष्वेडिकाशोकोत्तंसिकाचूतभंजिका।पुष्पावचायिकाचूतलतिकाभूतमातृका।
कादंबयुद्धानिनवपत्रिकाबिसखादिका।शक्राचीकौमुदीयक्षरात्रिरभ्यूषखादिका।नवेक्षुभक्षिकातो
यक्रीडाप्रेक्षादिदर्शनं।द्यूतानिमधुपानंचप्रकीर्णानीतिजानते।नित्योनैमित्तिकश्चान्यःसामान्योन्योवि
शेषवान्।प्रछन्नोन्यःप्रकाशोन्यःकृत्रिमाऽकृत्रिमावुभौ।सहजाहार्यनामानोपरौयौवनजोपरः।विस्रंभ
जश्चप्रमाणाह्लादश्चैतेमहर्द्धयः।चक्षुःप्रीतिर्मनःसंगःसंकल्पोत्पत्तिसंततिः।प्रलापोजागरःकार्श्यमर
तिर्विषयांतरे।लज्जाविसर्जनंव्याधिरुन्मादोमूर्छनंमुहुः।मरणंचेतिविज्ञेयाःक्रमेणप्रेमपुष्टयः।नाय
कःप्रतिपूर्वोयमुपपूर्वोनुनायकः।नायिकाप्रतिपूर्वासावुपपूर्वानुनायिका।नायिकानायकाभासा

त्वुभयाभासइत्यपि। तिर्यक्षुचतदाभासाइतिद्वादशनायकाः। तेषुसर्वगुणोपेतः कथाव्यापीचनायकः। अन्वा
यवांस्तद्वेद्य उद्धतः प्रतिनायकः। ततः कैश्चिद्गुणैर्हीनः पूज्यश्चैवोपनायकः। समोन्यूनोपिवातस्यकनीयाननु
नायकः। स्यात्कथाव्यापिनीसर्वगुणायुक्ताचनायिका। हेतुरीर्ष्यायितादीनां सपत्नीप्रतिनायिका। ततः कै
श्चिद्गुणैर्हीनापूज्याचैवोपनायिका। समान्यूनापिवाकिंचित्कनीयस्यनुनायिका। तदाभासास्तथैवस्युर्भेदा
स्तेषांगुणादिभिः। नायकस्त्रगुणतउत्तमोमध्यमोधमः। प्रकृतेः सात्विकः सस्याद्राजसस्तामसस्तथा। सा
धारणोनन्यजातिः सविज्ञेयः परिग्रहात्। उद्धतोललितः शांतउदात्तोधैर्यशिक्षितः। शठोधृष्टोनुकूलश्चद
क्षिणश्चप्रशक्तितः। गुणतोनायिकापिस्यादुत्तमामध्यमाधमा। मुग्धामध्याप्रगल्भाचवयसाकौशलेन

धीराधीरा च धैर्येणास्वान्यदीयापरिग्रहात्। ऊढानूढोपयमनात्कन्या [redacted] ज्ज्ये
ष्ठाकनीयसी। मानर्द्धेरुद्धतोदात्ताशांता च ललिता च सा। सामान्या च पुनर्भूश्च स्वैरिणी चेति हन्नितः। आजी
वतस्कगणिकारूपाजीवाविलासिनी। अवस्थातोऽपराश्चाष्टौ विज्ञेयाः खंडितादयः। निद्राकूणितनेत्रा
क्षो नारीनखविभूषितः। प्रातरेति प्रियो यस्याः कुतश्चित्खंडितेति सा। चाटुकारमपि प्राणनाथं कोपात्पास्य
या पश्चात्तापमवाप्नोति कलहांतरिता तु सा। हृती महरहः प्रेष्य कृत्वा संकेतकं क्वचित्। यस्या न मिलितः प्रे
यान्विप्रलब्धेति तां विदुः। सा तु वासकसज्जा स्यात्सज्जिते वासवेश्मनि। प्रियमाप्तीर्णपर्यंकाभूषिताया
प्रतीक्षते। स्वाधीनपतिका सा तु यस्याः पार्श्वं न मुंचति। प्रियश्चित्ररतक्रीडासुरतास्वादनलोलुपः। पुष्पेषु

२२१ पीडिताकांतंयातियाःसाभिसारिका॥प्रियोदेशांतरेयस्याःसातुप्रोषितभर्तृका।यस्याःसमुचितेप्यह्निनवा
१२१ सीनेतिवल्लभः।विरहोत्कंठितासातुद्वात्रिंशदितिनायिकाः।हीनपात्राणिशेषाणिपीठमर्दीविदूषकः।
विटचेटौपताकाश्चसख्यश्चैषांपरिग्रहः।महाकुलीनतौदार्यंमहाभाग्यंकृतज्ञता।रूपयौवनवैदग्ध्यशी
लसौभाग्यसंपदः।मानितोदारवाक्यत्वमदरिद्रानुरागिता।द्वादशेतिगुणानायकेष्वभिगामिका
नाम्।मृद्वीकानारिकेराम्रपाकाद्याःपाकभक्तयः।नीलीकुसुंभमंजिष्ठारागाद्यारागभक्तयः।अंतर्व्याजब २२१
हिर्व्याजनिर्व्याजाव्याजभक्तयः।धर्मार्थकामोदर्काश्चप्रेमसंदर्कभक्तयः।वाक्यवृत्तप्रबंधेषुरसालंकारसं
करोन्।निवेशयंस्यनौचित्यपरिहारेणसूरयः।चतुर्हंस्यंगसंपन्नंचतुरोदात्तनायकं।चतुर्वर्गफलंको

नप्रबंधंबांधवीयति। मुखंप्रतिमुखंगर्भोऽवमर्शश्चमनीषिभिः। स्मृतानिबर्हणंचेतिप्रबंधेपंचसंधयः। अविस्त
तमसंक्षिप्तंश्रव्यवृत्तैःसुसंधिच। भिन्नसर्गांतवृत्तंचकाव्यंलोकोभिनंदति। पुरोपवनराष्ट्रादिसमुद्राश्रमवर्णी
नैः। देशसंपन्नबंधस्यरसोत्कर्षायकल्पते। ऋतुरात्रिंदिवार्केंदूदयास्तमयवर्णनैः। कालःकाव्येषुसंपन्नो
रसपुष्टिंनियच्छति। राजकन्याकुमारस्त्रीसेनासेनांगभंगिभिः। पात्राणांवर्णनंकाव्येरसस्त्रोतोधितिष्ठति
। उद्यानसलिलक्रीडामधुपानरतोत्सवाः। विप्रलंभाविवाहाश्चचेष्टाःकाव्येरसावहाः। मंत्रदूतप्रयाणाजि
नायकाभ्युदयादिभिः। पुष्टिःपुरुषकारस्यरसंकाव्येषुवर्षति। नावर्णनंनगर्यादेर्दोषायविदुषांमतं। यदि
शैलर्त्तुराष्ट्रादेर्वर्णनेनैवतुष्यति। गुणतःप्रागुपन्यस्यनायकंतेनविद्विषां। निराकरणमित्येषमार्गःप्रकृति

सुंदरः।वंशस्त्रक्कतादीनिवर्णयित्वारिपोरपितज्जयान्नायकोत्कर्षकथनंचध्वनितोतिनः॥ ॥अथैषांलक्षणो
दाहरणानि॥मनोनुकूलेष्वर्थेषुसुखसंवेदनंरतिः।असंप्रयोगविषयासैवप्रीतिर्निगद्यते।तद्रूपेणरसस्यभा
वोयथा।हरस्तुकिंचित्परिवृत्तधैर्यश्चंद्रोदयारंभइवांबुराशिः।उमामुखेबिंबफलाधरोष्ठेव्यापारयामासविलो
चनानि।अत्रबिंबोष्ठत्वादिभिर्मनोनुकूलेपार्वतीमुखेविलोचनव्यापारानुमितोमहेश्वरस्याभिलाषविशेषः
सात्विकोदेहानुसादात्सुखानुभवस्योत्पत्तिमात्रमनुमापयति।तद्रूपेणैवसात्विकोसतीजन्मयथा।अभू
द्रुःकंटकितप्रकोष्ठःस्विन्नांगुलिःसंववृतेकुमारी।तस्मिन्द्वयेनतत्क्षणमात्मवृत्तिःसमंविभक्तेवमनोभवेन।
अत्रस्वेदरोमोद्भेदयोःसात्विकयोःहत्मादाद्रसस्यरतिरूपेणाविर्भावोवगम्यते।जन्मेवसंचार्युत्सन्नोयथा।

तयोरपांगप्रविचारितानि किंचिद्व्यवस्थापितसंहृतानि। ह्रीयंत्रणामानशिरे मनोज्ञामन्योन्यलोलानि विलोचनानि
। अत्र ह्रीः संचारिभावो जायमानो रसस्य जन्मनोपपत्तिः। तदेवानुभावोऽनन्तो यथा। ततः सुनंदावचनावसाने लज्जां
मृदूकृत्य नरेंद्रकन्या॥ दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत्संवरणस्रजेव। अत्र दृष्टिलक्षणः शरीरारंभोनु
भावो भवन् रसाविर्भावं लक्षयति॥ अनुभावादेरनेकस्यैकस्य वा पुनरुत्पत्तिरनुबंधः। सोनेकस्य यथा॥ विवृण्व पुनः
ती शैलसुतापि भावमंगैः स्फुरद्बालकदंबकल्पैः। साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन।
अत्र देव्याः स्मरारौ पूर्वमुत्पन्ना रतिः साभिलाषतदवलोकनेन विविक्तवसंतादिभिरुद्दीप्यमाना रोमांचावहि
त्थलक्षणाभ्यां सात्विकव्यभिचारिभ्यामनुबध्यते। एकस्यैव पुनः पुनर्यथा। यांत्या मुहुर्वलितकंधरमान

१२३ नेत्रद्वंद्वं शतपत्रनिभं वहंत्या दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या गाढं निखात इव मे हृदये कटाक्षः। अत्र मा
223
लत्या माधवविषये पूर्वमुत्पन्ना रतिर्वसंतावतारतत्सन्निधिविशेषप्रदर्शनादिभिरुद्दीप्यमाना पुनः पुनरुत्पन्ने
नवलितग्रीवकटाक्षविक्षेपलक्षणेन शरीरारंभानुभावेनानुबध्यते। अत्रैव माधवस्य मालतीविषये तदहरेवोत्स
न्ना रतिस्तैरेवोद्दीप्यमाना हर्षधृतिस्मृतिमतिव्याध्यादिभिः संचारिभावैर्वागारंभेण चानुभावेनानुबध्यते। रतिरू
पेणोवरसनिष्पत्तिर्यथा। तेवीक्ष्य वेपथुमती सरसांगयष्टिर्निक्षेपणाय पदमुद्धृतमर्पयंती। मार्गाचलव्यतिकराकु
लितेव सिंधुः शैलाधिराजतनया न ययौ न तस्थौ। अत्र जन्मांतरानुभवसंस्कारात्प्रतिकूलेऽपि शूलिनि शैलात्म
जायाः सर्वकालमेवाविछिन्ना रतिः स्थिरं विप्रयुक्तस्य दुश्चरेणापि तपसा प्रार्थनीयसंगमस्य तस्याकस्मिकदर्शनेन।

दीप्यमानात्सद्यः समुपजायमानसात्विकस्वेदस्तंभवेपथूपलक्षितैर्हर्षधृतिस्मृत्यावेगसाध्वसादिभिर्व्यभिचा
रिभिर्भावैः पदविक्षेपलक्षणेन च शरीरानुभावेन संसृज्यते। सोऽयं विभावानुभावव्यभिचारिसंयोगैः रतिरूपे
ण रसो निष्पद्यते। रतिरूपेणैव रसपुष्टिर्यथा। पीनश्रोणिं गभीरनाभिं निभृतं मध्ये भृशोच्चस्तनं पायाद्वः परि
रब्धमब्धिदुहितुः कांतेन कांतं वपुः। स्वावासानुपघातनिर्वृतमनाल्लकालमीलद्दृशो यस्मिन्सोऽच्युतनाभिपद्म
वसतिर्वेधाः शिवं ध्यायति। अत्र सर्वदेवश्रीवत्सलक्ष्मणो लक्ष्मीविषये महाकुलीनत्वौदार्यस्थिरानुरागि
तारूपयौवनवैदग्ध्यशीलसौभाग्यमहाभाग्यादिभिः समुत्पन्ना रतिस्तदवयवविशेषकामनीयकविभा
वनेनोद्दीपनविभावातिशयेनोद्दीप्यमाना ब्रह्मणः समक्षमप्यालिंगनलक्षणेन शारीरेणानुभावेना

२२५ नुमीयमानांलज्जाप्रणाशलक्षणांप्रेमपुष्टेरष्टमीमवस्थामध्यास्ते।अत्रचानुक्ताअपिसात्विकाव्यभिचारि
णोन्येपिचानुभावविशेषाःप्रतीयंते।अयोपिचसमग्रात्मगुणसंपदाश्रयेश्रीवत्सलक्ष्मणितथाभूतातदभ्य
षिकावारतिःप्ररूढप्रेमप्रियतमालिंगनलक्षणेनोद्दीपनविभावेनोद्दीप्यमानानयननिमीलनानुमेयां
समस्तसात्विकानुभावव्यभिचारिहेतुंप्रेमपुष्टेरुत्तमामवस्थामाश्रयति।सोयंविषयसौंदर्यादाश्रयप्रकृतेःसं
स्कारपाटवादुद्दीपनातिशयाच्चपरांकोटिमावहन्रसःपुष्टइत्युच्यते।अत्रैवब्रह्मणः।अयंप्रतिमनोहरोम
मेयंहष्टिरितिरत्नाकरस्येयमात्मजेतिचंद्रामृतादीनामियंसौर्यतिविष्णोरियंप्रियतमेतिकामस्येयंजननी
त्यादिभ्यआलंबनेभ्यःसमुत्पन्नाप्रीतिःस्वावासानुपघातिनाशरीरसन्निवेशेनदृढङ्गमीलनजनितया

६२

चतदृग्घ्रातशंकयाउद्दीप्यमानात्तत्क्षणोपजायमानतयावेगस्मृतिवितर्कोन्मादमोहचिंतादिभिर्व्यभि
चारिभावैस्तदनुभैपैश्चस्तंभवेपथुप्रभृतिसात्विकैः शिवानुध्यानलक्षणेनवुध्यारंभानुभावेनसंसृ
ज्यमानापरं प्रकर्षमारोहतीतिप्रतीयते। रतौ भयादिसंकरो यथा। राहोश्चंद्रकलामिवाननचरीं दैवात्स
मासाद्यमेदस्योरस्यहृपाणापातविषया [redacted] दाच्छिंदतः प्रेयसीं। आतंकाद्विकलं द्रुतं करुणया विक्षोभितं विस्मयात्क्रोधेनज्वलितं
मुदाविकसितं चेतः कथं वर्त्ततां। अत्रमाधवस्यमालत्यां पूर्वमुत्पन्नारतिस्तदवस्थालोकनादिभिरु
द्दीपनविभावैरुद्दीप्यमानाभयशोकविस्मयक्रोधहर्षैरपिरसांतरैः पृथक्पृथग्विभावानुभावव्यभि

२२५ [redacted]
चारिसंयोगान्निष्पद्यमानैः संकीर्यमाणमनोवाग्बुद्धिशरीरारंभानुभावैर्भयाद्यनुरूपैश्च सात्विकव्य
२२५ । भिचारिभिः संपर्के परं प्रकर्षमारोहंती प्रतीयते। तत्र चेतसो वैकल्यादि परिभावनं मन आरंभो वाक्यो
च्चारणं वागारंभः राहोरिव दस्योश्चंद्रकलामिव प्रेयसीमित्यादिबुद्ध्यारंभः आछिंदतइत्यादिशरी
रारंभः भूयादीनां च पंचानामपि यथाक्रमं राहोरिति चंद्रकलामिवानचरीमिति दैवात्समासाद्य
इति दस्योरस्यत्कृपाणपातविषयात्किति आछिंदतः प्रेयसीमित्यालंबनविभावास्तत्स्वरूपपरिभा २२५
वनात्तूद्दीपनविभावाः विकलं द्रुतं विक्षोभितं ज्वलितं विकसितं चेतइत्यनुभावाः आतंककरुणा

विस्मयक्रोधमुदनुरूपाश्चकंपाश्च स्तंभवैवर्ण्यरोमांचादयः सात्विकाः मोहविषादवितर्कौग्र्यताधृत्यादयो व्यभि-
चारिणश्चानुमीयमाना निष्पत्तिहेतवो भवंति। सोयं तुल्यकालबलोसन्निकारणानां भयादिनिष्पत्तीनां रसो सं-
सर्गः संकर इत्युच्यते॥ रतिरूपेण रसप्रकर्षस्य ह्रासो यथा। कोपो यत्र भ्रूकुटिरचना निग्रहो यत्र मौनं यत्रान्यो-
न्यस्मितमनुनयो दृष्टिपातः प्रसादः। तस्य प्रेम्णस्तदिदमधुना वैशसं पश्य जातं त्वं पादांते लुठसि न च मे म-
न्युमोक्षः खलायाः। अत्र योषितिरोषाख्यसांते रतिरुक्ता राज्ञस्तु रुषे चान्यरागात् रतिप्रकर्षस्य ह्रासो वगम्य-
ते। रतिरूपेण हीनपात्रेषु रसाभासो यथा। विक्किणाइ माहमासम्मि पामरो पार डिंबइल्लेण। ढिंढं समु-
म्मुरे सामली रथणएणि। अत्र छंतो। तिर्यक्षु यथा। पाअ डिअं सोहग्गं तंगाए उव हगोट्ठमज्झम्मि।

अन्यरागादिति पाठांतरं॥२॥ विक्रीणीते माघमासे पामरः प्रावारं बलीवर्देन। दृष्टिमुर्मुरे श्यामला... ाः स्तनेनिपण्णं॥२॥ प्रकटितं सौभाग्यं गवा पश्यत गोष्ठमध्ये। दुष्टवृषभस्य शृंगे अक्षिपुटं कंडूयमानया॥१॥

=पुलकं जनयंति दशकंधरस्य राघवशराः शरीरे जनकसुतास्पर्शमहार्घविधितकरतलाकृष्टविमुक्ताः॥ १ = उद्वहति नवतृणांकुररोमांचप्रसाधितान्यंगानि प्रावृड्लक्ष्म्या पयोधराभ्यां प्रतिप्रेरितो विंध्यः॥ २ =

१२६ ।दुट्ठवसहस्स सिंगे अच्छिउडं कंडुअंतीए। नायकप्रतियोगिषु यथा। पुलअं जणेंति दहकंधरस्स राहवसरा स
286 रीरम्मि जणराअसुआफं॰ समहग्घविअकरअलाअट्ठि विमुक्का। गोणेषु यथा। उव्वेहइ णववतिणंकुररोमं
चपसाहिआइँ अंगाइँ। पाउससलच्छीअ पउ॰ हरोहिं पडिवेल्लिओ विंझो। तएते चत्वारोपि रसाभासा उच्यंते।
रताववैवल्ज्जारोषरूपरसांतरयोः प्रशमो यथा। दृष्टे लोचनवन्मनाङ्मुकुलितं पार्श्वस्थिते वक्त्रवन्न्यग्भूतं
बहिरासितं पुलकवत्स्पर्शे समातन्वति। नीवीबंधवदागते शिथिलतामाभाषमाणे ततो मानेनापगतं ह्रियेव
सुदृशः पादस्पृशि प्रेयसि। अत्र बलवद्व्यां प्रियप्रेमानुनयाभ्यां व्रीडारोषयोरुपशमः क्रियते। रताववैरोषरू १२६
परसस्पर्शोयथा। एष्यत्युत्सुकमागते विवलितं संभाषिणि स्फारितं संश्लिष्यत्यरुणं गृहीतवस

दर्पो२

नेकोपांचितमूलतम्रामानिन्याश्चरणानतिव्यतिकरेबाष्पांबुपूर्णेक्षणंचक्षुर्जातमहोप्रपंचतुरंजातागसि
प्रेयसि। अत्रकस्याश्चिद्दूलवताप्रेम्णाम्लूलितस्यापिमानस्यशेषोनुवर्त्तते। तएतेभावादशापरसप्रका
राहासादिष्वपिप्रायशोदृश्यंते। ग्रंथगौरवभयात्कैश्चित्केचिदुदाह्रियंते। तत्र। न्यंगब्रीडादिभिश्चेतोविका
सोहासउच्यते। तद्रूपेणरसस्यभावोयथा। कनककलशस्वच्छेराधापयोधरमंडलेनवजलधरश्यामामा
त्मद्युतिप्रतिबिंबिताम्। असितसिचयप्रांतभ्रांत्यामुहुर्मुहुरुत्क्षिपन्जयतिजनितब्रीडाहासः प्रियाह
सितोहरिः। अत्रराधयाहरिन्यंगाद्दूरेत्कब्रीडातोहासस्यसत्तामात्रंप्रतीयते। कोकश्चिन्नस्यैवैर्यमभी
ष्टविरहादिभिः। तद्रूपेणरसस्यनिष्पत्तिर्यथा। हृदयान्तापयातोसिदिक्षुसर्वास्तुदृश्यसे। वत्सरणम

२२७ गतोसीति संतापादनुमीयसे। अत्र दशरथस्य रामवियोगादुत्पन्नस्तद्गुणस्मरणादिभिरुद्दीपितश्चिंतासं
227 तापादिवाग्गारंभेण चानुषज्यमानः शोकरूपेण रसो निष्पद्यते। प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोध उ
च्यते। तद्रूपेण रसस्य निष्पत्तिर्यथा। मय्येवमस्मरणदारुणचित्ततुल्ये वृत्ते रहः प्रणयमप्रतिपद्यमाने। भेदा
द्भुवोः कुटिलयोरतिलोहिताक्ष्या भग्नं शरासनमिवातिरुषा स्मरस्य। अत्र यद्यपि विभावानुभावसंचारि
संयोगलक्षणाया रसनिष्पत्तेरधिकमतिरुषातिलोहिताक्ष्येति प्रकर्षनिमित्तमतिशब्दोपादानं विद्यते त
थाप्युत्तमनायिकाश्रयः प्रियविषये न रोषः प्रकर्षमासादयति॥ कार्यारंभेषु संरंभः स्थेयानुत्साह उच्यते। तद्रू २२७
पेण रसस्य जन्म यथा। मूर्द्धा जांबवतोभिवाद्य चरणावापृच्छ्य सेनापतीनाश्वास्याश्रुमुखान्सुहृत्कं प्रिय

सखीन्नेष्यान्समादिश्यच। आरंभंजगृहेमहेंद्रशिखरादंभोनिधेर्लंघनेरंहस्वीरघुनाथपादरजसामुच्चैःस्मर
न्मारुतिः॥ अत्राभिवादनाप्रश्नाभाषणसमादेशनाद्रिशिखरारोहणेष्टदेवतास्मरणानांपूर्वरंगपर्यवसायिते
नानुद्दीपनविभावत्वादनुत्साहानुभावत्वाच्चनायमनुबंधोनिष्पत्तिःप्रकर्षोवाभवति॥ भयंचित्तस्यवैक्लव्यंरौद्रा
दिजनितंविदुः। तद्रूपेणरसस्यानुबंधोयथा। मंत्रान्मृत्युजितोजपद्भिरसकृद्ध्यायद्भिरीशान्स्तुराद्बुध्यत्तालु
भिराकुल्याकुलपद्वैर्निर्वाघ्निरुत्कंपिभिः। अध्वन्यैरिहजीवितेशमहिषव्याधूम्रधूमाविलालंघ्यंतेक्रूरिमांसद्य
स्मरणात्कौलेयकाःपल्लयः। अत्रयद्यपिपल्लीनामालंबनत्वंतद्विशेषणयोरुद्दीपनत्वंमंत्रजपादेरनुभा
वत्वंतालुशोषादीनांव्यभिचारित्वमितिविभावानुभावव्यभिचारिसंयोगोस्तितथापिमंत्रजपेष्टदेवतानु

१२८ ध्यानयोर्लंघनोपायपरत्वात्तभयरूपेणारसनिष्पत्तिः।अत्रधन्यानांहितनिष्पन्नावत्ससत्वनयात्तंभमोहमूर्छाम
रणादिभिरुपायप्रयोगोनघटते॥ जुगुप्सागर्हणार्थानांदोषसंदर्शनादिभिः।तद्रूपेणरसस्यानुगमोयथा॥ हेह
स्तदक्षिणमृतस्यशिशोर्द्विजस्यजीवातवेविसृजशूद्रमुनौकृपाणं।रामस्यगात्रमसिनिर्भरगर्भखिन्नसीता
प्रवासनपटोः करुणाकुतस्ते। अत्रयद्यपिद्विजशिशोजीवनायमुनिरपिशूद्रोवध्यइतिनरामस्यात्मकर्मनिं
दातथाप्यनपकारिणंजिघांसतोघृणाप्रवर्त्ततइतिसीतापरित्यागविषयत्वेनैवात्रजुगुप्सानुगमोग्रहीतव्यः।शं
बूकविषयेपुनरस्याजन्ममात्रमेवेति॥ विस्मयश्चित्रविस्तारःपदार्थातिशयादिभिः।तद्रूपेणरसस्यजन्मय १२८
था।कृष्णेनाद्यगतेनरंतुमधुनामृद्भक्षितास्वेच्छयासत्यंकृष्णकएवमाहमुसलीमिथ्यांबपश्याननं।व्यादेही

= तेषां एतच्छायं निश्चललोचनशिखं प्रोषितप्रतापं आलेख्यप्रदीपानामिव निश्चलकं प्रकृतिचटुलत्वमपि विगलितं ॥५॥ = वंदि अकालगर्जनपरीजलजलधरा निपतनमतिनव एषः पत्युर्धनुरवकांक्षिणि रोमांचं किंमुधावहसि ॥६॥ =

तिविदारितेतुवरदनेदृष्ट्वा समस्तंजगन्मातायस्यजगामविस्मयवशंपायात्सवःकेशवः। अत्रशिशोर्मुखेजगद्दर्शन
मालंबनविभावः। तत्सामग्र्यशेशवाद्यालोकनमुद्दीपनविभावःविस्मयवशंजगामेत्यनेनाऽनुपात्ताअपिसंचा
रिणोनुभावाश्चगम्यंते। संभ्रमश्चेष्टाप्रतीघातोभयराणामयादिभिः। तद्रूपेणरसस्यपुष्टिर्यथा। तंताणहअच्छाअं
मंतियस्योद्भटं विश्वामित्रजयोर्जितस्य भुजयोर्विस्फूर्जितं गूर्ज्जराः॥ औदार्ययथा॥ दिङ्नातंगघटाविभक्तचतुराघाटा मही साध्यते सिद्धा सापि वदंत एव हि वयं रोमांचिताः पश्यत॥ विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो यस्मादाविरभूत्कथाद्भुतमिदं यत्रैव चास्तंगतं॥ महाभाग्यं यथा॥ दोर्निर्ष्येषक्षिट्शरीरवज्रशकलप्रत्युप्रस्टव्रणाग्रं युद्धासिनिभग्नमोघमघवन्मातंगदंतोद्यमे॥ भर्त्तुर्नरेंद्रनंदेवता विरचितस्रग्दाम्निभूम्नेः स्तुतावीरश्रीरिवतस्य वक्षसि जगद्वीरस्य विश्राम्यतु॥ कृतज्ञता यथा॥ कृतककुपितैर्बाष्पांभोभिः सदैन्यविलोकितैर्वनमसिगता यस्य प्रीत्या धृतापि तथांबया॥ नवजलधरश्यामाः पश्यन्दिशो भवतीविना कठिनहृदयो जीवत्येव प्रिये सतव प्रियः॥ रूपसंपद्यथा॥ व्यूढोरस्कोवृषस्कं

धःशालप्रांशुर्महाभुजः॥अयन्निव॥रघुःक्रमोद्योवनभिन्नशैशवःपुपोषगंभीरमनोहरंवपुः॥वैदग्ध्यसं
पद्यथा॥कोयंभामिनिभूषणांकितवतेश्रोणाःकथंकुंकुमात्कूर्पासांतरितःप्रियेविनिमयःपश्यापरंरंका
स्तिमे॥पश्यामीत्यभिधायसांद्रपुलकोमन्द्रंन्मडान्याःस्तनौहस्तेनप्रतिनिर्जिनेंदुरवतातद्धूतेहसन्वोहू
रः॥शीलसंपद्यथा॥कात्वंशुभेकस्यपरिग्रहोवाकिंवामदभ्यागमकारणंते॥आचक्ष्वमत्वावशिनां
रघूणांमनःपरस्त्रीविमुखप्रवृत्ति॥सौभाग्यसंपद्यथा॥असौविद्याधारःशिशुरपिविनिर्गत्यभवना
दिहोपातःसंप्रत्यविकलशरच्चंद्रमधुरः॥यदालोकस्यानेभवतिरुन्मादतरलैःकदाक्षैर्नारीणांकुव
लयितवातायनमिव॥मानितायथा॥यदास्यकामंभवतासमाच्यतामितिक्षयंनैतदनल्पचेतसां॥कथं

[redacted]

प्रसत्याहरणेषु विराणांश्रियाः परानुवृत्त्यामलिनीकृताः श्रियः॥ उदारवाक्यत्वंयथा॥ ख्याता एव वयंजगत्सु
चरितैर्वाग्मिभः किमाख्यायते सयत्नो भवद्भाक्तिरस्ति भवतः सत्यं मनुष्यो भवान्॥ शास्त्रैरन्यधीयमानयज्ञा
मः प्रायो वयं तेषु च प्राहस्तेन नु संति ते पि गिरयो ये वानराः शस्त्रिणाः॥ स्थिरानुरागिता यथा॥ न ततः केर
प्युक्ते परिणायविधौ काष्ठमुनिभिः पुराणो रात कल्पितहृदयेन क्षितिभृता॥ विनावाच्यं नैतत्स्वमतिनिधा
याननमघः पतद्बाष्पैर्भोभिर्निखिलमिवदन्त प्रतिवचः॥ नायिकागुणोषु स्त्रियामहाकुलीनता यथा॥ मा
नुषीषु कथंवास्याद्स्य संभवः॥ न प्रभातरलंज्योतिरुदेति वसुधातलात्॥ औदार्यं यथा॥ भ्रूभेदे सहसोक
ते पि वदनं नीतं परां नम्रतामीषन्मां प्रतिभेदकारि हसितं नोक्तं वचो निष्ठुरं॥ अंतर्वाष्पजलिकृतं प्रभुन

पुरुषसदृशंतेवरंराक्षससदृशंकृतंनिशाचरपतिनाकथंतावच्चिंतितस्युलभंमहिलासदृशंनसंपतितिमेमरणं २

याचक्षुर्नविस्फारितंकोपस्यप्रकटीकृतोदयितयामुक्तश्चनमन्युः।महाभाग्यंयथा।तांनारदःकाचित्कन्या
२८८ २५८ किलप्रेक्ष्यपितुःसमीपे।समादिदेशैकवधूंभवित्री।प्रेम्णा।।शरीरार्द्धंहरोहरस्य।कृतज्ञानायथा।।पंरिस
सरिसंतुहकच्चिअररवससरिसंकंअनिसाअरवइणा।।कहआ(णा)चिंतिज्जमहिलासरिसंनसंपऽणाइ
मेमरणं।।रूपसंपद्यथा।आभरणस्याभरणंप्रसाधनविधेःप्रसाधनविशेषः।।उपमानस्यापिसखेप्रत्यु
पमानंवपुस्तस्याः।यौवनसंपद्यथा।उन्मीलितंतूलिकयेवचित्रंसूर्यांशुभिर्भिन्नमिवारविंदंवभूवत राम
स्याश्चतुरस्रशोभिवपुर्विभक्तंनवयौवनेनावैदग्ध्यसंपद्यथा।एकवामनसंनसंगतिःपरिहृताप्रस्फुटू २८८
मादूरतःतांबूलानयनछलेनरभसाश्लेषोपिसंविघ्नितः।आलापोपिनमिश्रितःपरिजनंव्यापारयंत्या

तनरपहिणी प्रियदर्शना च वाजा च प्रोषितपतिका च। असती प्रतिवेशिनी कुर्गता च नवबलु वाणिज्ं शीलं १॥

तिंके कांतं प्रत्कपकाटनश्चतुरयाकोपः कृतार्थीकृतः। शील संपद्यया। चतुरघरिणी पित्रं दंसरागात्रवा
लापउत्थवइत्थात्र। असइसत्रस्सत्रात्रराग खंडित्रं शीलं॥ सौभाग्य संपद्यया। संचारिणी दी
पशिखेवरात्रौ यं यं व्यतीयाय पतिंवरा सा। नरेंद्रमार्गा दृइवप्रपेदे विवर्णभावं स स भूमिपालः॥ मानिता
यथा शैलात्मजापि पितुरुद्धिरसोभिलाषं व्यर्थं समर्थ्य ललितं वपुरात्मनश्च। सख्योः समक्षमितिचा
धिकजातलज्जा शून्या जगाम भवनाभिमुखं कथंचित्। उदारवाक्यत्वेयथा यथा कृतं वेदविदां वरचपा
जनो यमुच्चैः। पदं लघनोस्युकः। तपः किलेदं नतदवाप्ति साधनं मनोरथानाम गतिर्न विद्यते। स्थिरानुरा
गितयथा॥ अलं विवादेन यथा श्रुतं च या तथा विधस्तावरशेषमस्तु सः। ममीत्र भावेकरसं मनः स्थि

रनकामवृत्तिर्वचनीयमीक्षते।पाकभक्तिषाटाव[illegible]तेस्वादुमृद्वीकापाकं यथा।आक्रामंदहताद्भुतः प
२८९ रिभवोयेनाथसंध्यानतोसेर्ष्यावोवतुचंडिकाचरणापास्त-पातयंतीपतिं।कुर्वन्यधिकंक्लेतप्रतिकृतंमु
केनमैौलेमुहुयषिष्येणादृतकज्जलेवलिखितंलक्ष्येववंद्रेयथा।अघतयोः स्वादुनारिकलीरीपाकंय
या।जहद्ध्यातहरमिश्रंजाश्चापत्तापइंगेश्चाधूआघरसानिश्चस्तश्चज्जविशैौकोऊहत्वाइश्चंइ।
श्चारिमध्यंतेषुस्वादुस्वादुत्तरस्वादुतममित्यात्रपाकंयथा।शापादसिप्रतिहतास्मृतिलोपक्षेभर्तु
र्व्यपेततमस्तिप्रभुतातवैवाच्छायानमूर्छतिसलोपहतप्रसादेशुद्देतुदर्प्यणातलेसुलभावकाशा।य रम
न्नापेतिनचातिशोभतेतन्नोलीणांयथाहित्वासीतांदशमुखरिपुर्नोपयेमेयदन्यांतस्यएवप्रति २८९
=गयाइत्थातथारमितंजायाश्शापतिंगताइतिाःगहत्वामिनोघापिसकोतहलान्यक्षी[illegible]न्नि॰४=

॥बहुवल्लभस्य या भवति वल्लभा कथमपि पंच दिवसानि। सा किं षष्ठं मार्गति कुतो मिष्टं च बहुकं च॥३॥ वेपते यस्य सव्रीडं वलितं वाच्यनिपुलकाचितस्तनकलशं प्रेमस्वभावविमुग्धं द्वितीयपार्श्वगमनोत्सुकं वामार्धं॥४॥

कृतिसखोपक्रन्नूनाजह्माराव्रत्तांतेनश्रवणविषयप्रापितेनातेनभर्त्तुः सादुर्वारव्ययमपिपरित्यागदुःखं
विषेहे॥ यद्दीपेतिचशोभतेचततकुसुमरागंयथा॥ बहुवल्लहस्सजाहोइवल्लहाकहयिपंचदिंहिअ
हाइं साकिंछट्ठंमग्गाइकंत्तोमिट्ठंचबहुवं च॥ यन्नापेत्यपिचशोभतेतन्मंजिष्ठारागंयथा॥ वेवइ
जस्ससविडिअंवलिअंपेमहइछसुक्कारइंस्सयणाअलसंायेम्मसहवविमुहिअंचीओवासगम
मुस्सुवामद्धं॥ गूढव्यलीकमंतर्व्याजंयथा॥ प्रत्ययोऽस्मितेगोकुलस्यशायनादुःखभमूढस्यमेसा
गोत्रस्खलनादेपेनुचदिवाराधेनिभीरोशिति॥ रात्रावस्वपतोदिवाचविजनेनोमनिचाभ्यस्यताराधा
प्रस्मरतः श्रियंरमयतः खेदोहरेःपातुवः॥ अगूढव्यलीकंबहिर्व्याजंयथा॥ चक्षुर्यस्यतवाननादपग

२९० 290 तेनाभूत्कचिन्निर्वृत्तंयेनैषामनंतचंदेकशायनंवक्षःस्थलीकल्पितायेनोक्तासिविनात्वयामङ्गगाढ
न्मंक्षरागाज्ज्ञायतेसोयंदंभधृतव्रतःप्रियतमःकर्त्तुंकिमभ्युद्यतः।अव्यलीनिर्व्याजंयथा।किंकंठे
शीथिलीकृतोभुजलतापाशःप्रमादान्मयानिद्राछेदविवर्त्तनेष्वभिमुखंतायासंभाषिता।अन्य
स्त्रीजनसंकथालघुरहंस्वप्नेचयावीक्षितादोषंपश्यसिकिंप्रियेपरिजनोपालंभयोग्येमयि।ध
र्मोतुवंधिधर्मोदर्कंयथा।अयसविषयव्यावृत्तात्मायथाविधिसूनवेनृपतिककुदंदत्वायूनेसितातपवा
रणां।मुनिवनतरुछायांदेव्यातयासहशिश्रियेगलितवयसामिक्ष्वाकूणामिदंहिकुलव्रतं।अर्था राम
नुबंध्यधर्मोदर्कंयथा।भूत्वाचिरायसदिगन्तचतुरंपत्नीदौष्यंतिमप्रतिरथंतनयंप्रसूपतत्संनिवेश्य २९०

तमेरेणास्तेहैवंमत्त्रीशान्येकरिष्यसिपरंपुनराश्रमेस्मिन्।यत्पुनःकाममेवानुवध्नातिनत्कामोद
र्कयथा।अहैतंसुखदुःखयोरनुगुणांसर्वास्ववस्थासुयद्विश्रामेहृदयस्ययत्रजरसायस्मिन्नहा
र्योरसः।कालेनवरणात्ययात्परिणतेयत्स्नेहसोवस्थितंभद्रंतस्यसुमानुषस्यकथमप्येकंहियत्प्रा
प्यते।नानालंकारसंसृष्टैःप्रकाराम्बरसोक्तयः।इत्युक्तंतत्रालंकारसंसृष्टेरित्येववक्तव्येना
नायहरांगुणरसानामुपसंग्रहार्थं।तेषामपिहिकाव्यशोभाकरत्वेनालंकारत्वात्।यदाहकाव्य
शोभाकरान्धर्मानलंकारान्प्रचक्षते।तेचाद्यापिविकल्प्यंतेकस्तान्कार्त्स्न्येनवक्ष्यति।काश्चिन्मार्ग
विभागार्थमुक्ताःप्रागप्यलंक्रियाः।साधारमलंकारजातमन्यत्प्रदर्श्यते।तत्रकाव्यसोभाकरानित्य

नेनश्लेषोपेमादिवत्तद्गुणारसभावतदाभासप्रशमादीनप्यपरह्लाति। मार्गविभागकृतं गुणानामलंकि
२६१ 291 योपदेशेनश्लेषादीनां गुणानामिवालंकारत्वमपि ज्ञापयति श्लेषः सादः समता माधुर्यं सुकुमारतार्थ
व्यक्तिरुदारत्वमोजः कान्तिसमाधयः इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः। तेषां विपर्ययः प्र
योगोडवर्त्मनि लक्ष्यते। इति श्लेषादीनां दशानामेव मार्गप्रतिभाकारितां ब्रुवन काव्यशोभाकरत्वे
न गुणान्तराणामप्यलंकारत्वमुपकल्पयति। तदाह कस्तान्कार्त्स्न्येन वक्ष्यति। युक्तमिदमयुक्तं त्वि
दमुक्तं। रसानामलंकारतेति तेषां गुणानामिवालंकारव्यपदेशाभावात्। नायुक्तं। उक्तोत्कर्षाणामूर्ज राम
स्विरसवत्प्रेयानामुपदेश—नात। यथा। प्रेयः प्रियतराख्यानं रसवद्रसपेशलं। ऊर्जस्वि रूढाहंकारं यु २६१

क्रोत्कर्षं च तत्त्रितयं तत्रोर्जस्विरूढाहंकारमित्यनेनात्मविशेषनिष्ठस्योक्तः एवं जन्मनोऽनेकजन्मानु
भवसंस्काराहितं इति मन्नः संप्रामेगुणसंपदुत्थानातिशयहेतोर्विशेषस्योपसंग्रहादहंकाराभिमा
नशृङ्गारापरनाम्नो रसस्य मानमयविकाररूपेणाभिमानिनां मनसि जायते ततः परां कोटिमुपव
र्णयति । रसवृद्ध्रसपेशलमित्यनेन विभावानुभावव्यभिचारिसात्त्विकसंयोगाद्रसनिष्पत्तिरिति र
त्यादिरूपेणानेकधाविर्भवतोऽभिवर्द्धमानस्य परप्रकर्षगामिनः शृङ्गारस्य मध्यामवस्थां सूचयति
प्रेयतरारव्यानमित्यनेन समस्तभावमूर्द्धाभिषिक्तायारतेः परप्रकर्षाधिगमात्भावलाभिरामे भाव
रूपतामुल्लंघ्य प्रेमरूपेणापरिणतायामुपादानात्भावांतराणामपि परकर्षाधिगमे रसरूपेण

परिणतिरितिज्ञापयन्नालंकारस्योत्तराकोटिमुपलक्षयति।सर्वेषामपिहिरत्यादिप्रकर्षोगाररतेभि
२९२ योररोप्रियःपरिहासप्रियोऽमर्षप्रियइतिप्रेम्णोवपर्यवसानंभवति।युक्तोत्कर्षंचतत्त्रयमित्यनेनायु
२५८ क्तोत्कर्षाणांत्रयाणामप्यूर्जस्वि।प्रभृतीनांगुणत्वमेवनालंकारत्वमित्यवस्थापयति।तथाहि।ऊर्जि
त्यंभाविकंप्रेयइतिगुणोऽभिमन्यतेकुतःपुनरिदंएकदोर्ज्जस्विरसवत्प्रेयसामलंकारत्वमन्यदागुण
त्वमुच्यतेभूमिनिन्दाप्रशंसासुनित्ययोगेतिशायने।संसर्गेस्तिविवक्षायांमतिशायनेवाभूम्निवामतु
वर्थीवंतिमतुवादयः।यथागोमान्देशःवाचालोवटुःवाग्मीविपश्चित्फलिनोवृक्षाःबलवान्मंदः राम
दंडीगोमतिज्ञोगोति।तत्रोर्ज्जस्विरसवतोरलंकारत्वविवक्षायामतिशायनेवाभूम्निवामतुवर्थीयः २९२

गुणत्वविवक्षायांतुप्रशंसानित्ययोयोरितिद्रष्टव्यं।नित्योहिकाव्येगुणयोगइश्वरसादियोगः।गुण
वतोरसवतश्चातिशयितैवास्याःप्रशंसासर्गस्तु।गुणानामवश्यमुपादानेषुनिंदापुनर्दोषहानेनाव
तरतिगुणेषुप्रेयइतिनरूपाभेदात्कथमलंकारत्वेनतदुत्कर्षप्रतीतिः।यथा।युधिष्ठिरःश्रेष्ठतमःकुरू
णामिति।तत्रातिशायिगुणेगुणांतरेणातद्वृत्तिरितिचेत्।इहापियुक्तोत्कर्षेचतत्रयमितिवाक्यांतरे
णाभविष्यति।नचातिशायिकाःस्वार्थातिरिक्तंकिमपिब्रुवते।अपितुप्रकृतरूपार्थमेवप्रकर्षादि
कंगमयंतिस्वार्थिकेषुस्वयंतेविधीयंते।एवमवस्यापितेगुणरसानामलंकारत्वेषट्प्रकारकोरसा
लंकारसंकरःसंभवति।गुणसंकरः।अलंकारसंकरसंकरः।रससंकरः।रसगुणसंकरः।रसालं

२९३ 293 कारसंकरश्चेति नन्वत्र गुणानां संकरव्यवहारो नोपपद्यते बहुष्वपि गुणेषु गुणावदित्येव व्यपदेशा
तामेवं त्रिविधा गुणा। शब्दगुणाः। अर्थगुणाः दोषगुणाश्चात तु प्रत्येकं द्विधा उल्लेखवंतो निरुल्ले
खाश्चात्र शब्दगुणे अर्थगुणाः दोषगुणाश्च ते तु प्रत्येकं द्विधा उल्लेखवंतो निरुल्लेखाश्चात्र
शब्दगुणेषु समाधिमाधुर्यौदार्यगांभीर्यादयः सोल्लेखाः श्लेषप्रसादसमतासौकुमार्यादयो नि
रुल्लेखा अर्थगुणेषु प्रसादरीतिकात्स्न्यादयः सोल्लेखाः अर्थव्यक्तिसौक्ष्म्यगांभीर्यादयः सोल्ले
खाः श्लेषप्रसादसमतासौकुमार्यादयो निरुल्लेखा। सोल्लेखानामेवं विजातीयानां तु निरुल्लेखा राम
नामपि संकरव्यवहारः प्रवर्तते सजातीयानां शब्दगुणेषु समाध्यादीनां यथा गानवपल्लवे सह लोल २९३

= अपिशब्दात् सोल्लेखानामपि ॥ =

= नवपल्लवेषु लोजति घूर्णति विटपेषु वलति भिरवनेषु स्फुरति च स्तबकेषु मा

इषोलइविलवेस्तुवलइसिहरेस्तु। यवइत्यवएस्तुअतहावसंन्नतत्स्थोअसोअस्तअत्रान्यधर्माणाम
न्यत्रारोपणां समाधिः। पृथक्पदनामाधुर्यंविंषविकटत्वमुदारताध्वनिमत्तागाभीर्यमिति। सजातीयाः
संकीर्यंते यतोवसंतलक्ष्मीरशोकस्य इति पदयोः श्रा हृध्वनिरपि परिस्फुरति यथा कस्यचिदशोकस्य
मानिनोगेषु प्रियांगनासविलासंचेष्टते तथा अस्येयमिति। अन्यगुणेषु श्लेषादीनां यथा। जनःपुरोप
यार्णायाञ्जलधिजलभावंजलमुचः तथा चस्यचैनंतिदधतुस्तुभैः स्तुक्तिवदनेततस्तां श्रेयोभिः परिणा
तिमसौविंदतु यथा तु चिंतनंनवीनस्तनिहृतितवायंविलुठति। अत्र संविधानस्तुसूत्रता श्लेषः। अर्थस्य
प्राकंघप्रसादः। उंस्तत्यादिक्रियाक्रमोरीतिः। दीप्तरसत्वंकांतिः इत्यर्थगुणाः सजातीयाः संकीर्यंते।

२६५ दोषगुणेषु प्रमादीनां यथा। हन्यते सा वरारोहा स्मरेणाकांडवैरिणा। हन्यते चारुसर्वांगी हन्यते
मंजुभाषिणी॥ अत्र हन्यत इत्यमंगलार्थं वरारोहेत्यश्लीलं। हन्यत इति पुनरुक्तं चारुसर्वांगीत्यु-
295 क्तौ वरारोहेति व्यर्थं। त एते सजातीयास्त्वारोपि दोषगुणाः संकीर्यमाणाः कस्यचिदुन्मत्तभावि-
णोऽनुकंपाद्यतिशयविवक्षायामभ्यनुज्ञायंते। यदाहुः अनुकंपाद्यतिशयो यदि कश्चिद्विवक्ष्यते॥
न दोषः पुनरुक्तादौ प्रत्युतेयमलंक्रिया॥ अथासजातीयानां शब्दगुणानामर्थगुणानां च सं-
करो यथा। को नाम नोदयति नास्तमुपैति को वा लोकोत्तरः पुनरयं सविता जगत्सु। यत्रोदयास्- राम
मयभाजि रुचां निधाने द्वेधा भवत्यहोरात्रिक्षणादेति कालः। यत्र यावदर्थपदतास्मिन्नत्वं सम्यग- २६५

थविकटत्वमुदारता विशेषणगुणायोगादात्तत्वमिति शब्दगुणाः। उक्तार्थनिर्वहणं प्रौढिः। अर्थप्राक
ट्यं प्रसादः। रूढाहंकारच मौर्जित्यमित्यर्था गुणाः संकीर्यन्ते। शब्दगुणानां दोषगुणानां चयथा। ए
त्येहि वत्स रघुनंदन पूर्णचंद्र चुंबामि मूर्ध्नि चिरं न परिष्वजे त्वां॥ आरोप्य वा हृदि दिवानिशमुद्वहा
मि वंदेथवा चरणपुष्करद्वयं ते। अत्र भावत्ता वाक्प्रतिपत्तिर्भाविकत्वं प्रसिद्धार्थपदता प्रसादः प्रिया
र्थपदोपादानं प्रेय इति शब्दगुणाः एत्येहीति पुनरुक्तं वत्सेत्यनन्त्यात्वत्पादाब्जद्वयं वंद इति विर
द्धं मूर्ध्नि चुंबामि हृदि वहामीत्यादौ वंद इति क्रियापात्स्वनुपयोगात पूर्णचंद्रेति दर्शनादि क्रियोपयोगित्वा
र्थं चेति दोषगुणाः परस्परसंकीर्यंते रसाक्षिप्तचित्तादौ हि पुनरुक्तादयो तद्दुष्यंति अर्थगुणानां

दोषगुणानां यथा। किं द्वारि दैवहितिके सहकारके रासंवेष्टितेन विषपादपएव पाद्यः। अस्मिन्ननाग
२९५ पि विकाशा विकारभाञ्जि भीमा भवंति मदनज्वरसन्निपाताः। अत्र दीपर सत्वं कांतिः अर्थ माकंदप्रसा
295 द उक्तार्थ निर्वहणं प्रोद्दिरित्यर्थगुणाः दैवहतिकेति विषपादपोयं पापड्त्यमंगलार्थीयामं
कि मिनेन संवर्द्धितेन इत्यत्र मदनज्वरसान्निपाता इत्यत्र च कृत्यप्रयोजनादेर्विऽरहिणोः स्फुरि
त्वादेरध्याहारादसंपूर्णवाक्यतायामर्थव्यक्तिविपर्ययः अस्मिन्विकाशा विकारभाञ्जीति विका राम
शशब्दस्य पुष्पविषयस्य वृक्षेपि प्रयोगेऽवाचकत्वात्। अयमर्थ इति दोषगुणा मिथः संकीर्यंते य २९५
तो रक्षेत्सो पात्यारहासलेशोक्त्यामंगलं प्रविशापिंडी। द्वारं मिभक्षयेतिन्यायात प्रसिद्धाध्याहारः। व

दतिमंचाः क्रोशंतिइतिप्रयोगदर्शनादाधाराधेययोरभेदोपचारःस्वविरूद्धलक्षणादिभिःप्रयुज्य
मानोनदोषाति अथालंकारसंकरः सयद्यपिव्यक्ताव्यक्तोभयान्मततयातिलतंदुलकादिभिदैःप्रधा
नांगभावसमकक्षताभ्यां पुरस्तादुक्तः तथापितेषांगुणादिसंकरासाधारणत्वात संप्रतिसाधार
णःप्रकारउच्यते। सषोढाशब्दालंकारसंकरः अर्थालंकारसंकरः उभयालंकारसंकरः शब्दाल
कारसंकरः शब्दोभयालंकारसंकरः अर्थोभयालंकारसंकरः तेषुशब्दालंकारसंकरोयथा हंसा
लीभयातरलासारासरसासमसारसरासा। अंबररमारूढासारासरसासरासुसारसरासा अत्र
संस्कृतप्राकृतभाषाश्लेषः गतप्रत्यागतंचित्रंपारावृत्तियमकंवर्णानुप्रासश्चेतिचत्वारः शब्दालं

=हंसालीति। अस्यार्थः। हंसाली हंसपंक्तिः रंयवत्साका। भवदमस्तर्पमाकृता। किंभूता। भयेनचंचला। पुनः सवत्सावत्समसहिता। पुनः सरासाः सशरस्थेसावसाक्षेपारसः क्रीडाय ... पुनः आवासेशादयोदसक्तासहिता। पुनः सवरणं सवेगमनोनाम्येतेभिम्यते

= नयपनुकेवलंदीपशिखासाछपंचंपकैः प्रतिपन्नं कज्जलकार्यमपिह्लनंमुपदिकमङ्कि र्भमरैः॥४=

२६६ कारसंकरोयथावासावस्थिततताम्रचूडवपसामायाभिभिः कूजितैर्दूरादप्यनुमीयमानवसतिर्ग्रामो
यमंतर्वंशायत्ते दीमसरगालकूढविसरकुकूडम्पाघनंसंध्यांतोल्लसद्छमल्लपटलछायाअटा
256 लमितिचकारकेहेतुःजायमानपदार्थस्वरूपाभिधानंजातिरित्यर्थालंकारारिश्चत्वारोमिथःसं
कीर्यंते उभयालंकारसंकरोयथागाहूरावरंदीवसिहासाविच्छंचंपरशहिपडिवसांकज्जलपट
लानामिवमुपभ्रमरपटलालोमिलननान्मेलितंचंपकदीपलिकयोरिवभ्रमरकज्जलपटलयोरौ
पम्यादिसंबंधान्नमुच्चयइस्फभयालंकाराश्चत्वारोमिसंकीयंते शब्दार्थालंकारसंकरोयथा॥सवी राम २६६
शारुधिरगधवारधिसदात्सारंगाङ्गवरूढकुधिक्षामक्ष्मारुहिमंरन्मधुलिहिस्वछंदकुंदद्रुहितु

स्मत्स्त्रोतसितज्ञम्भूभिरजसिज्वालायमानं नभसि ज्येष्ठेमासिखरार्कतेजसिकथंपथ्यंब्रजन्जीवसि
अत्रावचित्तिकारीतिः यद्देभक्तिमुद्रा अनुप्रासश्चेतिशब्दालंकाराः जातिः ज्ञापककारकहेतुः चित्रहेतु
श्चेतिअर्थालंकाराः ञ्चेह संकीर्यन्ते एवमुभयालंकारसंकरो यथा स्तोकस्तोकमम्भूभि अंबरं रनत
लेताराभिरस्तंगतं गछत्यस्तगिरेः॥ शिरस्तदनुचछायाटरिद्रुः श्यामीप्रत्यासन्नतरोदयस्यतत्व
रोर्विंवारुणिम्नातते मतिष्ठारसेलाहिनीदिगचिप्राचिसमुन्मीलिती अत्रसमुन्मीलतीतिविभक्ति
मुद्रा स्तोकं स्तोकंमस्तगछतीचादिरत्यनप्रासश्वशब्दालंकाराः हेतपमासमाधिरनक्रमः समच्च
योक्तिश्चेति उभयालंकारामिथः संकीर्यन्ते अथोभयालंकारसंकरो यथा खल्ववस्तेकलविं- कं

-कलविंकोयामचटकः॥१२-

ठमलिनंकदंविनीकंबलचर्चोपारपतीवदर्दुरकुलंकोलाहलेऽन्मदंगंधंमुंचतिसिक्तजालसुरभिं
२९७ वैर्षरादग्धास्थलीदुर्लक्ष्योपिविभाव्यतेकमलिनीहासेनभासांपत्तिः अत्रजातिरनुमानंकार
297 कज्ञापहेतुत्वेचस्वत्वर्थालंकाराः रूपकोपमीहेतूपमोत्प्रेक्षोपमा चेति उभयालंकाराः मिथसं
कीर्यंतेनगुणालंकारसंकरोपिव्याख्यातः अतोयद्यपिगुणवत्वेवावाक्येसंकरयोगस्तथापि
क्वचिद्गुणस्यप्राधान्यंक्वचिदलंकारस्येतिप्रधानांगभावेनगुणालंकारयोः संकरव्यवहारः प्रव राम
र्ततेसचषोढाशब्दगुणप्रधानत्वर्थगुणप्रधानः दोषगुणप्रधानः शब्दालंकारप्रधानः अर्थालंका २९७
रप्रधानउभयालंकारप्रानश्चेतितेषुशब्दगुणप्रधानोयथाप्रामश्रीरेषकस्मात्पुनरपिमयितंसं

यदिदं विदध्यान्निद्रामप्यस्य पूर्वामनलसमनसो रागाप्यहं तर्कयामि सेनुं वध्नामि भूयः किमिति
च सकलद्वीपनाथान्नुयातत्वेप्यायाते वितर्कानिति विदधत इवाभाति कंपः पयोधेः अत्र हेतूत्प्रे
क्षाभिधाने त्वयीत्यादौ परे विस्मुः स्वरूपाध्यासेन तद्भावापत्तेः समाधेः प्राधान्यमिह प्रतीयते
वनुचापमर्थस्य प्राकट्यात् प्रसादोर्थगुणः कस्मान्न भवति अस्मिन्नपि तद्वपरेशेन शब्दश् =विस्मुयपदेशोक-५=
क्लेषाधिक्यात् न तु न त्वयीत्येष इत्येष इत्यस्येति युष्मदेतदिदमां कश्चिन्न विस्मवाची सकथं व
र्णनीयवस्तूनि तमर्थमभिदध्यात् उच्यते सर्वनामत्वेनैषां सर्ववाचित्वात् सर्वनामानि हि सर्वभि
नाभिधायीन्यपि प्रकरणादिगम्यविशेषमिवत्र वर्तते स चेह प्राप्तश्रीरित्येवमादिभिरभिन्न एवा

२६८ 298 भिगम्यतेइतिअर्थगुणप्रधानोयथालक्ष्मीवशीकरणचूर्णसहोदराणित्वत्पादपंकजरजां
सिचिरंजयंतियोनिंप्रणाममिलितानिनृणांललाटेलुंपतिदैवलिखितानिदुरक्षराणि
अत्रहेतुवाक्यउभयालंकारपिप्राधान्येनार्थप्राकषमर्थगुणःप्रतीयतेदोषगुणप्रधानोय
थायेनोपविद्धसलिलस्फुटनागसद्मादेवासुरैरमृतमंबुनिधिर्ममंथेव्यावर्त्तनैरहिपतेरय =कैशाम:१४=
माहितांकःखंव्यालिखन्निवविभातिसमंदराद्रिः अत्रव्यावर्त्तनैरहिपत्तेरयमाहितांकइ
तिज्ञापकहेतोखंव्यालिखन्नितेउत्प्रेक्षावयवाच्चदेवासुरैरितिनित्यंविवक्षायांबहुवचनअमृ राम २६८
तमंबुनिधिर्ममंथइतिद्विकर्मकेष्वपिमथिप्रभृतीनामुपसंख्यानमित्यमृतशब्दात्द्वितीयेतिदो
वैरा

षगुणयोः प्राधान्यं प्रतीयेतेन नु चात्राप्यर्थस्य प्राधान्यं न भवति नहि विषयस्य ज्ञापकहेतुनायहृततला
त। सोप्यर्थालंकार एव गुणालंकारयोः स्वतुल्यकथतायाम लंकारः प्रधानं भवति न गुणाः गुणो
हिं गुणभूतैरेवालंकाराः प्राय आरभ्यंतेतद्यथा अस्पृष्टा दोषमात्राभिः समग्रगुणगुंफिता। विपंची
स्वरसौभाग्या वैदर्भी रीतिरिष्यते समस्तात्युत्कटपदामोजःकांतिसमन्विता।। गौडीयां तां विजानं
ति रीतिं रीतिविचक्षणाः।। आश्लिष्टश्लथभावां च पुराणच्छायमाश्रितां।। मधुरां सुकुमारां च पांचाली
कवयो विदुः।। माधुर्यमपि वांछंतः प्रसादं च सुमेधसः।। समासवंति भूयांसि न पदानि प्रयुंजते।। लाटी =पांचाल्यां २=
यावंतयो रीत्योर्मागध्यां च क्वचित् क्वचित्।। केचिदोजोभिधित्संतः समस्यंति बहून्यपि प्रतीतशब्द

२९६ 299 गुणस्यतुश्लाघ्यविशेषणायोगाउदात्तत्वमित्यादेःकिमितिप्राधान्यंनभवति॥शेषगुणानामती
वोल्लेखविधित्वेनप्राधान्यात्॥सावामनप्रसिद्धिलंकारप्रधानोयथा॥पञ्चेन्द्रकोटिकरकोरक
-वरभाजिवभ्राजिमबभ्रुकलशिजटापटलेहरस्य॥तदः पुनातुहिमशैलशिलातिकंजमं
कारंडवरविहा-सुरापगांभः॥अत्रार्थप्राकट्यंप्रसादःविभवोत्कर्षउदात्तता॥मदुमस्फु
टोन्मिश्रवर्णानामवैषम्यंसमताबंधगाढतौर्जित्यमित्यादिभ्योगुणेभ्यःप्राधान्येनशब्दालं राम
कारानुप्रासःप्रतीयते।अर्थालंकारप्रधानोयथाआश्लेषिणःस्फुरतरुक्मपीतशीतमायामि २९६
नीघनमुदारजनीर्युवानः।कर्वैर्मुहुर्घलनसंधिलोलपादांतसंवलिततलोलपटाःस्वपंतिअत्र

वंधविकटत्वमुदारताश्लाघ्यविशेषणयोगउदात्तताविभवोत्कर्षआदार्यदीप्तरसत्वंकान्तिरित्या
दिभ्योगुणेभ्यः प्राधान्येनजातिरथ्यालंकारः प्रतीयते उभयालंकारप्रधानो यथा॥ अभ्युद्धृतावसुम
तीदलितंरिपूरः क्षिप्रक्रमंकवलितावलिराजलक्ष्मीः अत्रैकजन्मनिकृतंयदनेनयूनाजन्मत्र
येवदकरोत्पुरुषः पुराणः॥ अत्रोक्तिपरिपाकः प्रौढिः वंधविकटत्वमुदारता आशयोत्कर्ष उदात्तत्व
अर्थप्राकट्यंप्रसादः इत्यादिभ्योगुणेभ्यः श्लेषोपसर्जनाविशेषोक्तिरुभयालंकारः प्राधान्येन
प्रतीयते। रससंकरोपिचालंकारसंकरवदेवभावरसाभावप्रशमानांतिलतंडुलादिप्रकारेणसं
करः षट्प्रकारोभवतितत्रभावानांतिलतंडुलप्रकारोयथान्यक्कारोह्यदिवजत्रकीलइवमेतीव्रः परि

=तात्पर्यत्वंजातिर्गकगपसद निद्वनोगकडम्रात्र कृएणमसे अजायाद पिवर्न मे०२

स्यंदते घोरां धेतमसीव मज्जति मनः समीलितं लज्जया॥ शोकस्ताक्ष्यं विपत्तितो दहति मां यत्ना
३०० स्त्येव यस्मिन्क्रियामर्मोरायेव पुनः छिनत्ति करूणासीतां वराकी प्राता॥ अत्रामर्षलज्जाशोका
300 नुकंपाः समकक्षतयाभिव्यक्तिलतंडलवत संकीमाना रामस्य विवहिणोवागारंभानुरागो
क्तिपरतया प्रतीयंते॥ क्षीरनीरप्रकारोयथा॥ मानोन्नतेत्यसहने त्यातिपंडितेतिमप्येवधि
कतिरनेकमुखी सुखीनां॥ दाक्षिण्यमात्रमसृणेन विचेष्टितेन धूर्त्तस्य तस्य तु गुणानुपरं राम
जपंति॥ अत्र सखीषुरोषः प्रियगुणेषु चासूयाक्षीरनीरवन्मिथः संकीर्यमाणा मानिनीवा ३००
गारंभपरतया प्रतीयते॥ छायादर्शप्रकारो यथा आः सीते पतिगर्भे विभ्रमत्नसमातन्त्रमहाध

वप्रंधंसस्मितकांतिमन्नवतदाजातंयदेतत्सुखं।।संप्रत्येवहठात्तदेवकुरुतेकेशोच्चयोत्कर्षणा
त्रासैःत्वानितलोलनलोचनपतद्बाष्पप्लुतशाबराः।।अत्रक्रोधाभासेधार्यादर्शन्यायेनरत्याभा
सःसंकीर्यते।।नरसिंहवद्यथा।।किंहारिदैवहनिकेसहकारकेण।।संवर्द्धितेनविषपादपएष
यायः।।अस्मिन्ममनागपिविकात्सविकारभाजिभीमाभवंतिमदनज्वरसान्निपाताः।अत्रनर
सिंहजातावेवसिंहनरशरीरभागोसहकारवर्णनाशृंगारंभानुसारेणसखीविषयानु
कंपासहकारविषयाचकुत्सामिथःसंकीर्यंततथाहिदैवहतिकेशावेनलब्धायांनित्यरूपा
धौसर्वथैवानुकंप्यमानत्वापांसहकारसंवर्द्धननिषेधनत्त्वमेवास्याःकेनाघोत्पत्ते।।एवनाम

३०१

त्वंहैवोपहतासियनसहकारविषयादयंद्वारिसंवर्द्धयसिविषयादन्यशब्देनलब्धायांत्यह
कारस्यसर्वथैवकुत्सायांविकासकलेकामिनीनाममसहस्यस्मरेज्वरेसंन्निपातहेतु
त्वकत्वमेवस्या०कनन्त्रस्ययेनप्रत्याप्यतेतद्युक्तंकुत्सितत्वेनकुत्सावान्सम्यग्वापिहिकुत्सि
तःस्वशब्दाभिहितेकेनविशिष्टोर्थःप्रतीयते॥नचसांप्रतिकाकुत्साशब्दाभेदप्रतीयतेपूज्यते
कुत्सितत्वेपिप्रकारोयथा॥मागर्वमुद्वहकपोलतलेचकास्तिकांतस्वहस्तलिखितापिमं
जरीति॥अन्यापिकिनसखिभाजनमीदृशानांवैरीनवेन्नन्नचेद्भवतियाशिवेपथुरंतरायः ॥ राम ३०१
अत्रस्वसोभाग्येप्रत्तिपिडेमांसलदकयोरविविभागमापाद्यमानयोरिस्तूयागवयोःसंकरउप

प्रशस्तत्वेपिकुत्स्यतेनयथाः एकाश्शजीवलोकेजीवतिस्वंपंनकृपपपस्तुकृपः यःप्रेमपारापारोमृगद्ववनस्यगीद्यमंपतति पांसलरकाश्च
=ग्रथमाणात्=

यपंद्यंते। चित्रवर्णप्रकारेणयथाविरोधोविश्रांतः प्रवसतिरसोनिर्वृतिघनस्तैरेोहृत्यंक्वापिव्रज

तिविनयः प्रह्वयतिमां। स्फटित्वास्मिन्दृष्टेकिमपिपरवानस्मियदिवामहार्घस्तीर्थानामिवहिम

तांकोप्यतिशयः॥ अत्रवीरोद्भुत्यस्वातंत्र्यरसानामानंदप्रश्रमपारवश्यरसैस्त्रिस्त्रियमाणा

नांपटवीलादिभिःसितादीनांप्रसमाः। रामदर्शनप्रभावोभवेलक्ष्वस्यविस्मयातिशयप्रशम

जन्मनिचागारंभानुभावोपमाद्भुवदेचित्रवर्णवत्संकीर्यमाणास्समुपलभ्यंते। अथ — — य

णसंकरः। ननुचदोषहानिम्निवगुणोपादानमपिनियमनिवर्त्यंअलंकारयोगइवरसाविये

गोप्यवश्यंयविधेयःकेदाचिदलंकारयोगोपिस्यजेतेनतुरसाधि — — भिचरितसं

३०२ 302

बंधाविति। अत्रोच्यते। यत्र चित्रवर्णवत् नरसिंहवद्वा स्तरकवत् अवयवावयविन्यायेन जाति
व्यक्ति ---- चापृथक्प्रयत्नाचनिर्वर्त्यानां गुणरसानां वाक्यसन्निवेशस्तत्र संकरव्य
वहारेण न प्रवर्त्तते। तद्यथा। मधुरं रसवद्धाचिवस्तून्यपि रसस्थितिः। येन माद्यति धीमंतो मधु
व्रताः। काम सर्वोप्यलंकारो रसमर्थे निषिंचति। तथाप्यग्राम्यतैवैनं भारं वहति भूयसा। शृंगा
र एव परप्रह्लादनो रसः। तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति शृंगारे विप्रलंभाख्ये करुणे
च प्रकर्षवत्। माधुर्यमार्द्रतां याति यतस्तत्राधिकं मनः। रौक्ष्यंद्रादयो रसा दीप्त्या लक्ष्यते काव्य
वर्त्तिनः। तद्व्यक्तिहेतू शब्दार्थावोजोधिष्ठाय तिष्ठति समर्पकत्वं वाक्यस्य यत्तु सर्वरसान्प्रति सम

राम ३०२

सारेगुणोज्ञेयसर्वसाधारणाक्रियःसेयंरसावागुणानांरंभकत्वेत्यंकणप्रसिद्धिःएवंरसानां
गुणारंभकत्वेपितद्यथारूढालंकारतोज्झित्यंभावतोवाक्यवृत्तिर्भाविकत्वक्रोधादावस्यती
व्रत्वंमाधुर्यंआश्रयोत्कर्षतुदात्ततंअर्थस्याभिष्टतन्मतोप्रेयःदीप्तरसत्वंकांतिरितियन्नतु
——निलेतंदुलवत्क्षीरनीरवतछायादर्शवत्तुल्यकक्षतयैवगुणरसानांवाक्येःपृथक्प्रये
त्नानिर्वर्त्यानांवोविनेवशास्त्रसंकरव्यवहारःप्रवर्त्तितएवसषोढागुणप्रधानोरसप्रधानभयप्र
धानःउभयाप्रधानगुणाधिकोरसाधिकइतितेषुगुणप्रधानोयथाअश्रांतेरेललितहारल
तानितंबसंवादनस्खलितवेगतरंगितांदेवीव्यपास्यशयनंधृतमानतंतुरंतःपुरःपुरंगीगती

सहसैव विदल्ले: अत्रार्थप्राकट्यौदार्ययोरर्थशब्दगुणयोः प्राधान्यं न भवति क्रोधयोरितिगुण
३०३ 303 प्रधानः रसप्रधानो यथा अस्मिन्नगरस्यतपिनाकभृता सलीलमारब्धवेपथुरधीरविलोच
नायाः विन्यस्तमंगलमहौषधिरीश्वरायाः स्रस्तोरगप्रतिसरेण करेण पाणिः अत्र श्ला
घ्यविशेषणयोगतुदात्तत्वं बंधविकटत्वमुदारता अर्थप्राकट्यं प्रसादः दीप्तरसत्वं कांति
रितिगुणाः साध्वसविलासानुरागमरसैरतिरुच्यत इति रसप्रधान उभयप्रधानो यथा
आपातमात्ररसिके सरसीरुहस्य किं वीजमर्पयितुमिच्छसि वापिकायां कालः कलिर्जगदि राम ३०३
दं न कृतज्ञमज्ञे स्थित्वा हरिष्यति तवैव मुखस्य शोभां अत्र भणितिविशेष उक्तिः संविधाने

स्वस्त्रत्राश्लेषदूतिश्राव्यगुणयोर्लावण्यविलासवर्णनीयरसंयोश्चतुल्यकक्षतयानिर्दिष्टा
स्फभयप्रधानःउभयाप्रधानोयथा अभिनववधूरोषस्वादुःकरीषतनूनपादसरलजनाश्लि
पश्लेषक्रूरःस्तुषारसमीरणःगलितविभवस्याज्ञेवाद्यद्युतिर्मसृणारवेर्विरहवनितावक्त्र
क्लैव्यंबिभर्त्तिनिशाकरः अत्रस्वादुक्रूरमसृणाक्लैव्यमित्यन्यधर्माणामन्यत्रारोपणासमा
भिःअभिनववधूरोषादीनांचतुर्णामप्यर्थानांस्वाह्लादीनांचलवद्रणादिलक्षितानांप्राकट्य
प्रसादःअभिनववधूरोषास्वादुःकरीतनूनपादितिविशेषणाविशेष्याणामुपक्रमेणानिर्वि
हणंरीतिः।पादचतुर्णामर्थानांविभज्यसमत्वेननिवेशःसमितत्वमितिचत्वारोगुणाःचत्वा

३०४ 304 रस्वरत्यमर्षविषादजुगुप्सात्मानो रसाः कालाचस्यानिवेदनपरत्वेनप्रतीयंत इत्यभयाप्रधा
नः गुणाधिकोपया अञ्जननिरस्त विभूतेरपूरणार्भवतु सर्वकामानां। मायाचिबिमासिविषि
मासदिषिपराभवंधनिनः। अत्र स्वप्रतिज्ञां डुःस्यति सोऽशेष्यं वाक्यानांपरिपूर्णत्वमर्थव्यक्तिः
।अर्थस्यप्राकघ्यंप्रसादः। विभूतेरनुत्पत्तौ कर्मैनपूर्यते अपरिपूर्णकामो याचते याचमानस्त
दनास्तदनाभुवन्वतिवः सवैतेसेवमानस्तरोः परिभूयते इत्य सैन्यादिक्रियाक्रमो रीतिरि
तिगुणाश्चत्वारः रसस्तु निर्वेद एवैक इतिगुणाधिकः रसाधिकोपयाकमलननंभसिक राम ३०४
मलेचकुवलयेतानिकनकलतिपांकाइत्यन्यधर्माणामन्यत्रारोपणां समाधिः साचस्कु

मारसुभगेस्फुरत्यानपरम्यपकेयंइत्यश्लीलामंगलार्थैर्दोषगुणावपिस्नाध्यविशेषरागगुण
योगउदात्तत्वविकटत्वंधत्वमुदारताभेदारीति।अर्थस्यप्राकट्यंप्रसादः।अनिष्ठरतासौकुमा
र्यंअभिष्टतमताप्रेयःदीप्तरसत्वंकांतिरितिगुणाः।शृंगारसास्त्ररत्स्फुरत्केर्षहर्षधैर्यौत्स्फुरत्कंठावेग
विस्मयवितर्कचिंताचपलताहासोत्साहस्तंभवद्रूदोन्मादव्रीडाअवहित्थाभयशंकाविंशति
र्वीगारंभानुभावेश्रृंगारिणाः।प्रियाचाटुकारस्यकस्यचित्प्रतीयंतइतिरसाक्षिकः।रसालंका
रसंकरोप्येतेनव्याख्यातः।रसवंतिहिवस्तुनिसालंकाराणिकानिचित्।।एकेनैवप्रयत्नेननि
र्वर्त्यतेमहाकवेः।रसाक्षिप्ततयायस्यबंधःशक्यक्रियोभवेत्।अपृथग्यत्ननिर्वर्त्यःसोलंका

रःप्रहृष्यते रसभावादिविषयं विवक्षाविरहे सति अलंकारनिबंधो यः स कविभ्यो न रोचते।
३०५ तत्र रसालंकारसंकरो द्विधा रसप्रधानोऽलंकारप्रधानश्च तयोर्यथावुभ विचित्रैव वर्ण्यते रसप्र
305 धानः तत्र त्वलंकारवतो वाक्यस्य वागारंभानुभावत्वं भवति तत्र रताबुपमायाः संकरो य
था तीर्थं दंसरागसुहरपन अरावलराजरागोओमुहम्मिमराग हरे रोसो विहरइहि अं अं
म अं अंपकोवम अनहलस्मिनि सरागो अत्रोपमातिरस्कारेण रसवतो हरेर्वचसि वागारंभ
रूपः रुक्मिणीप्रसत्तपारिजातमंजरीविलोकनं प्रभव सत्यभामायारोषरागमरागीयकं प्राधा राम
न्यतः प्रतीयते रतो वेव विपरीतोपमाया यथा पत्त्वन्नेत्रसमानकांति सलिले मग्नं तदिंदीवरं मे ३०५
घाःसुखवरस्सं नस्तुजगे भणायत्तस्य जन जनितोऽसुवेवमेना हेरं नीयो पिरस्वादि हृदयं मदयं कायव्यमगांके निषलः॥४=

गुरुजघनमप[redacted]स्तनभरमतिमागकवलनाभ्यस्तुलिताया विधेः स्वांतांगुलिमार्गविभ्रमं वरस्त्मात्त्रिवली ॰४२

घेरंतरितः प्रियेत्तवमुखच्छायानुकारः शशी। येपित्वद्गमनानुकारिगतयस्तेराजहंसागा
तास्त्वत्सादृश्यविनोदमात्रमपिमे दैवेन न क्षम्यते। अत्रविरहिणोरामस्यप्रियावयवसा
दृश्यदर्शनेनात्मानंविनोदतः उपायभ्रंशारतिप्रभेविषादवागारंभे स्वरूपाक्षिधानो
पक्षीराशक्तिरप्राधान्येनोपमाप्रतीयते। रतावेवविपर्यप्रायया। किंगुरुजहरांपर्याय
स्यहत्यराभरेतिभावअकरअलगांतुलिअं॥ एवंविहिणा स्वांतगुलिभंगाविभ्रमवंह
इसेतिवली अत्रयद्यपिरतिप्रभवेभ्योविस्मयादिभ्यः संशयहेतुत्प्रेक्षोपमाभ्यस्वपर्याया
लंकारः प्राधान्येनप्रतीयतेतथाप्यसौवगारंभानुभावइतिरतावप्यप्राधान्यमेवानुभवति

३०६ 306 रत्नावेव संप्रतिशयनैराख्यतुंगोस्तनेगो साकांक्षं मुहुरीक्षते जलभरप्रस्यंदिनी लोचने। अत्र
वत्सराजेन स्वहृष्टौ प्राणिधर्मा: समाधीयमाना: सागरिकार इनार्थे च गारंभे न्यगभवंति
रत्नावेवार्थश्लेषे यथा॥ कपोले पात्त्रालीकरतलनिरोधनमरिता निपीतो निश्वासैरयम
मृतहृद्योधररस:। मुहुर्लग्न: कंठेनरलयति वाप्यस्तनतटी प्रियो मन्युर्जातस्तव निरनु
रोधेन तु वया। अत्र यद्यप्याक्षेपेणावाक्योपसंहारस्तथापि प्रिय इत्यादिभि: प्राधान्येनाभि
धीयमानै: श्लेष एव वक्रश्रृंगारिणो विगारंभानुभावाग च मंगीकरोति रत्नावेव पर्यायोक्ते यथा राम ३०६
मुक्ता: कंधरयावृता: स्तनतटेनोत्तुंगता कुंभयो रुरूभ्यां परिणाहिता क्रमवतीहस्तस्य पद्भ्यां

गतिः। एतद्दुःकरीघातिनस्तत्कठिनेचमैंर्वक्रोयंहठम्बंडितित्रिपुरारिकेनिवचनैरार्यान्वि
तंयातुवः। अत्रभगवतश्चारुक्तिचागारंभेदेव्याः पर्यायवर्णानाश्लेषभावंलभते। यत्रउ
दासीनेनवरार्पितेसोलंकारप्रधानः सहिरसेभावा——देः संकरप्रकारः साम्वभावाक्ति
वक्रोक्तिंबावलवंतेतत्रस्वभावोक्तिपक्षेजातिः साविधिमरेवनयपाथ्यौंओउसरतरोसं
पोअपरिवट्टमः नपहरिसंतोहोइअद्दरपआसंउहअरसाअन्नविब्भमंतीअमुहा। अत्रस
त्यभामामायारोषस्यापसज्जनः प्रहर्षस्यचप्रसर्पतोयेनुभावाजिह्मावलोकनमुखप्रसादा
दयः तदहसकीर्यमाणाकविनोभयरसायतविभ्रममित्यनेनयथावदवस्थिताभवंतीति

=नीकापमत्तरोषंलोकपविवर्धमानमहर्षं·भवतिचहूरमकायांकभयवसायनविभ्रमंतमाकुलंवंः॥८

विधिमुखेनाधीयंते। जातिरेव निषेधमुखेन यथा धीरे रागामान भंगोमान रावलरोन —
३०७ 307 — गुरु आधीरारंभो उल्ललइ तुलिज्जंते श। एकम्मि विसे थिरं न लगाइ हे अअं। अत्र यद्यपि
हेतूपन्यासो वर्त्तते तथापि तस्य स्वभावाख्यान पशिकरचेना प्रधानेनेदृदयक्रियास्वरूप
मेव ह निषेधमुखेनाभिधीयते इतीयं जातिरेव भवति॥ सैव विधिनिषेधाभ्यां यथा। हे लाद
स्तम। हीधरस्यतनुतामालोक्य दोस्मा हं रेस्त्रे नासत देवलं व्यचरगावारोप्पतत्सादयोः
शैलोत्थारसहायत्ताजिगमिषोरस्पष्टगोवर्द्धनाराधायाः स्तुचिरं जयंति गगनेबत्धकर राम ३०७
भ्रांतयः। अत्र राधायाः प्रेयसि हरौ यथावदस्थितादूतवृत्तिस्त्रेहशकोत्साहाभियः संकी

यमाणतयावेगस्मृतिमतिवितर्कादिभिर्व्यभिचारिभावैरालंबनचरणाक्रमणसहकृतायां
करभ्रांतोशरीरारंभानुभावप्रतीयमाना अस्पृष्टगोवर्द्धनावंध्याइतिनिषेधमुखेनजयंती
तिविमुखेनचाभिधीयते।वक्रोक्तिपक्षउपमादयः तेषुउपनायथा। चोराम अस नह णा
पुरोणपुरोणायेस अयतिदिवीओ। अहिरम्मिअनिहिकलसेवपोक हलपइखराणुलग्गे
अत्र चौरगतभयानुरागयोः संकरस्वभावोक्तिमभिभूयोत्तरार्द्धेतिमोपम्यप्राधान्येनप्रती
यतेउपमेवरसाभाससंकर – षयायथा एकेनार्कप्रततनरूपापारल्लेनास्तसस्थेपइपच्य
स्कामसजलतरेलनापरेणात्मकोतां।अह्नः छेदेप्रविरपितततविरहाशंकिनीचक्रवाकीद्वौसं

चौराःसभयसतृष्णंपुनःपुनःप्रपश्यंतिदृष्टीः अभिलक्षितनिधिकलशस्येवप्रौढमहिलास्तनोत्संगे ।१=

कौरौरिचयतिरसौनर्त्तकीवप्रगल्भा। अत्रनिगदेनैवव्याख्यातेस्मेष्टतयैवोपमायाः प्रधान
त्वेनप्रतीतिः रसप्रशमयोरुपमानसहोक्तिर्यथा दृष्टे लोचनवर्त्मना मुकुलितं पार्श्वस्थिते वक्त्र
वेन्यग्भूतं बहिरास्मितं पुलकवत् स्पर्शे समातन्वति। नीवीबंधवदागतं शिथिलतामाभापमारोत
तोमानेनापगतं ह्रियेव सुतनोरंघ्रिस्पृशि प्रेयसि। अत्र कस्याश्चित्सखी विख्यातमानसंविधा
नकोपमानवत्याः प्रियसंदर्शनालालभविभावादुत्पन्नप्रकृष्टरतिप्रभवद्दर्षस्यापिभा
वेतयास्वेपि सर्पर्णादिभिरुद्दीपनविभक्तावैरुद्दिप्यमानेसमुत्पद्यमानेपुलकादिषुसमुत्प
द्यमानेषुव्यभिचारिषुनयननिमीलनामुख्यनीवीविश्लंसनादिभिरनुभावैः प्रकर्षारोपणादानंद

रत्नामापाद्यमाने स्थायिनि प्रबलविरोधिभावांतरोदयादेतेभ्य एव कारकेभ्यः प्रतिक्षणमा
पचीयमानयोर्लज्जारोषयोः प्रशमसंकरावभिभूय प्राधान्येनोपमासहोक्तिः संकीर्यते श्लेषा
द्यलंकारसंकरान्तु कश्चिदवास्तवमपि रसाभाससंकरं कवयः वर्णयंति। तत्र रूपकश्लेषेणाय
था राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी। गंधवद्रुधिरचंदनोक्षिता जीविते
शवसतिं जगाम सा॥ अत्र बीभत्सो रसः श्लेषरूपकसामर्थ्यादविद्यमानेनापि शृंगाररसेन संकीर्ण
इव प्रतीयते। श्लेषानुविद्धार्थांतरन्यासेन यथा दृष्टो कुहो अज्ञिलवा अबाओ देविमउलावइले
अणाभउंतो वेवि। अमसपहरकुवलअपच्चिन केदमोनुमाइणागाजणावहि। अत्र वीरो रसः
=रोद्ध इति अस्यार्थः। तत्र वीक्ष्य... संबोधने ... अपि ... अपचक्षुषा ...
=आपालक्ष्मीः कथं मोहं न जनयति ... अपि च विप्रलंभ शृंगार ... तेन तव मुकुलयति लोचनम् ... अपि अपचक्षुषा ...

३०९ 309

श्लेषसामर्थ्यादविद्यमानेनापि विप्रलंभशृंगारेण संकीर्यते श्लेषोपमा यथा क्षिप्तो हस्तावलग्नः प्रसभ
मभिहतोप्याददानोंऽशुकांतं गृह्णन्केशेष्वपास्तः। चरणापतितो नेक्षितः संभ्रमेण। आलिंगन्योऽवधू
तस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामीवार्द्रापराधः स दहतु दुरितं शांभवो वः शराग्निः
॥ अत्र करुणो रसः श्लेषोपमासामर्थ्येनाविद्यमानेनापि विप्रलंभशृंगारेण संकीर्यते। श्लेषव्यतिरे
केण यथा पश्यामूरुयुगं विभज्य भुजयोर्मध्ये निपीड्योरसा पार्श्वे बभ्रुसंभ्रमे प्रहृत्य नखैरर्दितैर्विलू राम ३०९
प्याधरं। सुमानयप्यवेध्य युष्मदाहितान्ययापि भुक्तवैनेकिं कान्तासु रतेषि गानहि व्याघ्रीकराला
नना। इह श्लेषसामर्थ्यादपारमार्थिको शृंगारप्रद्रुतातिः पारमार्थिकनं वीभत्सरसेन व्यावर्त्तमाना

तद्धर्माणां मिथः संसर्गबुद्धिमुत्पादयति। श्लेषरूपेण यथा। अन्त्रैः कलितमंगलप्रतिसरस्त्रिहस्तरक्तो
त्पलव्यक्तोत्तंसभृतः पिनह्य सहसा हृत्पुंडरीकस्रजः। एताः शोणितपंककुंकुमजुषः संभूय कांतैः
पिबंत्यस्थिस्नेहसुराः कपालचषकैः प्रीताः पिशाचांगनाः। अत्र विभत्सो रसः शावं मांसमप्यो क्षि
प्तेन शृंगाराभासेन संकीर्यते समाधिरूपकेण। यथा शिखंडे खंडेंदुः शशिदिनकरौ कर्णयुगले
तारास्तारांचलमुडुपचक्रं च कुचयोः। तडित्कांची संध्यासिचयरुचयः कल्पितरथं तवाकल्पः कल्पच्यु
परमविधेयो विजयते। अत्र भयानको रसः। अत्र समाधिरूपकाद्रूपकल्पिताकेलापरामर्णीयका
क्षिप्तेन शृंगाराभासेन संकीर्यमाणः श्रोतुः प्रेयोरसांगतां गच्छत्संगच्छते। एवमियमनेकप्रकारा सं

—ष्टिः।गुणालंकारसंकरप्रभवोभिमंतव्यः।तत्रापिप्रधानांगभावेनसमकक्षतयाचव्यक्तव्यक्तोभयात्म
३१० 310 त्मतिलतंडुलक्षीरजलवद्यादृक्षीकादयोभेदाःयथायोगमवगंतव्याः।तेकिंवक्तव्यानवक्तव्याःकथमनुक्ता
गम्यंते।उक्तेष्वेवांतर्भावात्।तथाअर्थाभयालंकाराभिधानेखंडवस्त्वइतिवचौपारयतीतिविभाक्ति
मुद्राकलविकक्कंठमलिनंकादावनीकेवलमितिपदमुद्राचशब्दालंकारावपिसंकीर्यमाणौप्रतीयेते
एवमन्यत्रापि।अंगांगिभावावस्थाततेसर्वेषांसमकक्षतादृत्यलंकारसंसृष्टेर्लक्षणायाद्वयीगतिः।अ राम
तत्रांगांगिभावेनावस्थानंयथा।आक्षिपंत्यरविंदानिमुग्धेतवमुखश्रियं।कोषदंडसमग्राणांकिं ३१०
मेषामस्तिदुष्करं।अत्रारविंदानिमुग्धेतवमुखश्रियमाक्षिपंतीत्युपमा।कोषदंडसमग्राणांकिमेषा

मस्ति दुष्करं श्लेषोपसर्जनामनाप्यतिरन्यासः प्रभवंति चारविंदानि कोषदंडसमग्राणि तेन किं तेषां
न किंचिदशक्यमस्ति कोषदंडयोर्विजयसाधनत्वात्। एतेन श्लेषस्य स्थानभूतार्थसमर्पकत्वाद्रूपमा
यास्तु प्रस्तुतसाध्यवस्तुविशेषकत्वादर्थांतरन्यासं प्रसंगभावो विज्ञायते सर्वेषां समकक्षतापत्त्यालिं
पतीव तमोंगानि वर्षतीवांजनं नभः। असत्पुरुषसेवेव दृष्टिर्विफलतां गता। ननु रसं बंधः समत्वात्
स्यादिति कथं सर्वेषां तुल्यकक्षतया संबंधोत्पत्तिः एवमन्यते। यदा त्वेषोपमादयोलंकारा विभावानुभा
३०१ वव्यभिचारिवर्णनापरतया रसादेरंगतां तां प्रतिपद्यंते तदा भवति तेषां तुल्यकक्षता। तत्र लिंपतीव तमो
गानि वर्षतीवांजनं नभ इति देवोत्प्रेक्षे। असत्पुरुषसेवेव दृष्टिर्विफलतां गतेत्युपमायवर्णनीयस

तमस उद्दीपनविभावभूतस्य समतैपैवोत्कर्षापादकत्वेनागभावमुपगतेति नास्ति लक्षणानुपपत्ति
रिति ननूपमा इमास्तिस्त्रोपि कस्मान्नोच्यते। इवो हि वाक्यान्तरेषूपमाया एव दृश्यते। नैव॥ उपमा
नोपमेयशब्दप्रतिपयत्नस्य सादृश्यार्थस्य द्योतनमित्वेन क्रियते। न चा। लपतीयादावुपमान
मुपमेयं वास्ति। यस्मादृश्यद्योतनायइवः प्रयुज्येत। न च तिङन्ते नोपमानमस्ति तस्य साध्यार्थाभि
धायित्वेनासत्त्वार्थत्वात्। तदाह। सिद्धस्य हि समानार्थमुपमानं विधीयते। तिङन्तार्थस्य साध्यत्वा
दुमार्थो न विद्यते। न चोपमीयामेवेवशब्दो भवति। तद्यथा। कथमिवैतद्भविष्यति। अस्तु वा लिंगपति
तैमसेनूपमानोपमेयभावस्तथापि तुल्यधर्मो न दृश्यते। य उपमानोपमेयभावाय प्रभवति कि

मन्येन लेपनमेव तिा तर्हि लिंपति नाकेन भाव्यं न हि लेपनं लिंपेः पृथग्भवितुमीषा ननु चेह हृपंच

कास्ति धातु लिंपति इत्यार्थश्च लेपनं । मेवं । एवं सति लिंपति रिवेति स्यात् । ननु लिंपती चेति । अ

थयष्या राहैः शिर इति भेदा भावव्यवयवावयविभावस्त्वयेह धर्मे धर्मिभावो भविष्यति । मेवं उपमा

नोपमेयभावस्य भेदसाहृश्यप्रतिपत्तिनिबंधनत्वात् । तदभावेपि यस्तन्मनुते स कथं नोन्मत्तः

स्यात् । तदुक्तं स एव धर्मो धर्मी चेत्सुन्मत्तोपि न भाषते । अस्तु तर्हि तिङ्वाच्यः । कं चीयमानमिति चे

त् । न्यग्भूतौ सौ क्रियापरे कथं पुनरसौ क्रियापचेन्यग्भूतो भवति । श्रूयते ताषड – स्तिङः तेन प्रतीयते

। क्रियाकाल उपग्रहः । साधनं संख्या पुरुषश्चेति । ते षु क्रियाकालात्मनेपदपरस्मैपदनिमित्तानिम

कृतिरभिधत्ते।प्रत्ययःसाधनंसंख्यापुरुषंच।एतेषांतुक्रियार्थत्वात्क्रियाप्रधानो।कालात्मनेपदनिमि
३१२ त्तेक्रियाविशेषणत्वेन।संख्यापुरुषौसाधनभूतमपिभूतंभव्यायोपदिश्यतइतिन्यायेनक्रियासि
312 द्धावुत्पन्नव्यापारंपरार्थेतस्याःक्रियायान‾वति।तेनायंकर्त्तास्वक्रियासिद्धाव्याकुलःकथमुपमा
नत्वेनोपमेयत्वेनचान्यपदपेक्षितुंक्षमते।एवंतर्हियोगा।निलिंपतितस्यशवन्यायबलाद्प्रति
पत्तिःशब्दोहिमुख्यागौणीलक्षणाभिरर्थप्रकरणादिसंपादितसाचिव्यादिभिस्तिसृभिर्वृ
त्तिभिरर्थविशेषप्रतिपत्तिनिमित्तंभवति।तद्यथा।गौरित्ययंशब्दोमुख्ययावृत्त्यासास्नादिमंतमर्थं राम ३१२
प्रतिपादयति।सएववृत्तिपन्नत्वादिगुणसंपदमपेक्ष्यवाहीकादौप्रयुज्यमानोगौणीवृत्तिम

नुभवति। यदा तु मुख्यया गौण्या वा उपात्तक्रियासिद्धौ साधनभावं गंतुमसमर्थः तदा लक्षणया स्वार्था
विनाभूतमर्थांतरं लक्षयति। यथा गंगायां घोषः प्रतिवसतीति गंगाशब्दो विशिष्टोदकप्रवाहे निरू
ढाभिधानशक्तिर्घोषकर्त्तृकायाः प्रतिवसनक्रियाया अधिकरणभावं गंतुमसमर्थः स्वार्थावि
नाभूतं तटं लक्षयतीति। न चैतासामिहान्यतमापि वृत्तिः संगच्छते। तथाहि। लिंपतेः क्रियावचन
त्वान्न मुख्या नापि क्रियाकर्त्तारसारूप्येण शुक्तिकादौ रजतादिवत्तद्भावापत्तिः क्रियागुणानां
कर्त्तर्यसंभवात्। साक्षादिवप्रयोगाच्च न गौणी। क्रियावचनत्वान्न मुख्या नापि क्रियाकर्त्तोरसा
रूप्येण शुक्तिकादौ रजतादिवत्तद्भावापत्त्या स्वयमेव धर्मरूपत्वात् बुद्धिः पश्यतीतिवदन्य

धर्माणामन्यत्राधिरोपणामुपचार इति न गौणीभिरउपचरिता इव शब्दा हू स्वथा सादृश्येपि स्पृशनात् ।
३१३ न लक्ष्येत यदि सं हि वशा हृः सादृश्यमेव विद्यात यतितिदालिंपति क्रियायाः सत्वभूते न तमसा सा
313 दृश्येन संभवतीति स्वार्थाविनाभूतं कर्त्तारमाक्षिपति । नैव ह लक्षणा विरूढलक्षणा द्वयोपि वर्त्तं
ते यथा प्रिये जने नास्ति पुनरुक्तं । स्वलेर सावपि न छ्यत एव कौलेरिति । न वशब्दान्यय विलंबिनी
पदार्थव्यत्पत्तिः । प्रेक्षाविद्भिरादियते यद्यप्यध्याहारादिभिरिदमपि स्यात् । तथापि तुल्यधर्मो मा राम
गेणीयः तद्द्वैव विप्रतिपत्तेः । न चेंदुमुखादिवदनभिधीयमानस्यापि तुल्यगुणस्य प्रत्ययो भ ३१३
वतीवाच्यां येषं दुखिते वक्रमिति कौतिः प्रतीयते । न तथा लिंपते लैपारन्यदत्र प्रतीयते । तदुपश्ले

षणाग्धेयलिंपतिर्ध्वांत्तकर्त्तकः। वर्षणार्थस्थविरद्विरदत्ने स्यतइतीक्ष्यतां। मन्ये शंकेध्रुवंप्रायो
नूनमित्येवमादिभिः। उत्प्रेक्षाव्यज्यतेशब्दैरिवशब्दोपिनादृशाः। वाक्यवैवेवमसंबंधेष्वनौचित्य
परिहारेणगुणालंकाररसंकरनिवेशोभवति। तत्रानौचित्यपरिहारोयथा। मायाकैकेयीद
शरथाभ्यां रामः प्रलंभितो नमातापितृभ्यामिति निर्दोषदशरथे। राममेवयोधयन्रामेण
वाली निहतो न सुग्रीवमिति महावीरचरिते। रुधिरप्रियराक्षसेन दुःशासनस्य रुधिरंपीतं
नभीमसेनेनेति वेणीसंहारे। दुर्वाससोपध्यानाद्दुष्यंतः शकुंतलास्वीकारंविसस्मार नानवस्थि
तानुरागतयेति शाकुंतले। लवणप्रयुक्तराक्षसाभ्यां वासोपस्कारेण तदभिधायसीतापरित्याज्ञि

नानेकैकेयीमंपराभ्यामितिस्खलितरामो।किंचदग्धायामपिवासवदत्तायांवैरप्रतिचिकीर्षयापद्मा
३१५ वतीमयोदाच्चवसितेचसमीहितेतयांविनाक्षणमपिनजीवामीत्यविज्ञातवासवदत्तासन्निधेर्व
315 त्सराजस्याधिप्रेवक्ष्याध्यवसायःप्रियाहृदयतोव्यलीकशल्यमुद्धरवानेतितापसवत्सराजेरौचा
क्षःस्वामिकार्यंसाधयामीतिप्रभुशभक्त्यानिरपराधामपिप्रेयसींहित्वास्वामिकार्यापेक्षयाह
मेवातवतिरेनानिजीवितोद्यतुकृतस्वामिकार्यस्तामेवानुगच्छामितिशिवगणःश्रूद्रकनिमि राम
त्तोमायामयींचितांप्रियासमक्षंप्रविशसापित्तत्प्रेमावदातदर्शनापहृतप्रियव्यलीकातद्वियोगका ३१५
तरातत्रैवात्मानंप्रतिविक्षेपेतिविक्रान्तश्रूद्रकइतितदेतद्दोषहानेगुणोपादानंतुसम्यग्गुणयोरे

नसंविधानेसुसूत्रता। अपिचचतुर्हस्त्या संपन्नमितिचतस्रोवृत्तयोभारत्यारभटीकैशिकीसा
त्वती। चेति। तत्रयावाक्प्रधानानृपतिप्रयोज्यास्त्रीवर्जितासंस्कृतपाठ्ययुक्ता। स्वनामधेयैर्भ
रतप्रयोज्यासाभारतीनामभवेत्तुवृत्तिः। यंत्रावपातप्लुतलंघितानिछेद्यानिमायाकृतमिंद्रजा
लं। चित्राणियुद्धानिचतत्रवृत्तिमरड्डीमारभंटिंवदंति। याश्लक्ष्णनेपथ्यविशेषयुक्तास्त्रीसंग
तायाबहुगीतवृत्ता। कामोपभोगप्रचुरोपचारातांकैशिकींवृत्तिमुदाहरंति। यासात्त्विकेनात्मगुणे
नयुक्तात्यागेनवृत्तेनसमन्विताच। हर्षोत्कटासंहृतशोकभावासासात्त्वतीतिप्रथितेहवृत्तिः। आसा
मंगानिषोडशांतेषुप्ररोचनाप्रस्तावनावीथीप्रहसनमितिचत्वारिभारत्यंगानि। तत्रवक्तव्यार्थप्र

शंसापरंवचःप्ररोचनाययथाजयतिभुवनकारणंस्वयंभूर्जयतिपुरंदरनंदनोमुरारिः।जयतिगिरिसुता
३१५ 315 निरूद्धदेहोदुरितभयापहरोहरश्चदेवः।प्रस्तुतवस्तूपपारस्नावसरसूचकंवचःप्रस्तावनाय
यथारत्नावल्यां।द्वीपादन्यस्मादपिजलनिधेर्दिशोप्यंतात्।आनीयझटितिघटयतिविधि
रभिमतमभिमुखीभूतः।उद्घात्यकादीनामंगानांप्रवृत्तिर्वीथ्या।उद्घात्यकःकथोद्घातः
प्रयोगातिशयःप्रवर्तकोअवलगितमिति।तत्रोद्घात्यकोयथा।कोजयतिजयतिशर्वःकेन
जितंजितमनंगदहनेन।त्रिपुरारिणाभगवताबालशशांकांकितजटेन।कथोद्घातोयथा राम ३१५
।सांकंपंकजजन्मनासुरपतेरभ्यर्थ्यभायावद्दशादिक्ष्वाकौःशारदिंदुबिंबविमलवंशेवनीपस्वयं।

शेषात्तपदं त्रयीपथजुषां विद्वेषिणां रक्षसं यः पौलस्त्यमहत्त्वपातु भवतो रामभिधानो हरिः ॥ प्रयो
गातिशयो यथा पूयापित्तमवतु हरेः क्ष्मामुद्धरतो वराहवपुषो वः ॥ शेषफणारत्नदर्पणास्तह
स्तसंक्रान्तबिंबस्याप्रवर्त्तकोपयोगिमवसंभृतं वधुजीवः ॥ अबलगितं यथा ॥ अमुमेवशरत्स
मयमाश्रित्यगीयतां ॥ तथा त्वसां ॥ सत्यक्षाः मधुरागिरः प्रसाधिताशातदोद्धतारंभाः ॥ निपतंतिधा
र्त्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥ स्वधर्मविता ॥ प्रचलितानांपात्मापसादीनामुपहासपरं वचः प्रह
सनं यथा ॥ श्रमणाः श्रावकवध्वाः सुरतविधोद्दशातिनाधरं ददते ॥ मदिराक्षिमांसभक्षणमस्मत्स
मयेनिविद्धमिति ॥ संक्षिप्तिकावपातोवस्तूत्थापनसंस्फोटइतिचतार्यारभटंगानि ॥ तेषुमोहेंद्र

३१६ 316

जालेनेपथ्यादिभिर्वस्तुसंक्षेपः संक्षिप्तिका यथा— रक्षसा मृगरूपेण वंचयित्वा स राघवौ । जह
रसीतां पक्षिंद्र— प्रयासक्षणविघ्नितः ॥ भयादिभिर्विद्रवादिकर्मानुप्रवेशनिर्गमनमवपातो य
था ॥ मृगरूपं परित्यज्य विधाय विकटं वपुः । नीयते रक्षसा तेन लक्ष्मणो युधि संशयं ॥ अविद्रु
वः सविद्रवो वा सर्वरसमासो वस्तुस्थापनं यथा ॥ राहोश्चंद्रकलामिवाननचरीं दैवात्समाघेम
दस्योरस्य कृपाणपातविषयादाछिंदतः प्रेयसीं ॥ आतंकाद्विकलं द्रुतं करुणया विक्षोभि
तं विस्मयात्क्रोधेन ज्वलितं मुदा विकसितं चेतः कथं वर्त्ततां ॥ नानास्त्रयुद्धनियुद्धादिभिः स
संरंभसंप्रहारः संस्फोटो यथा ॥ कृष्णायेन शिरोरुहेषु पशुना पांचालराजात्मजा येनास्याः

राम ३१६

परिधानमप्यद्भुतंराज्ञांगुरूणांपुरः।सपस्योरस्यलशोणितास्तवमहंपांतुप्रतिज्ञातवानसो
यंमद्भुजपंजरेनिपतितःसंरक्ष्यतांकौरवाः।नर्मनर्मस्फिजोनर्मगर्भइतिचत्वारिकैशि
कंगानि।तेषुस्थापितशृंगारवचोविचेष्टितंवामपरिहासंनर्मयथानामयथास्यकिंवराम
यंत्वकस्माद्विकलःकथांतेरकदंवगोलाकृतिमाश्रितःकथंविमुह्यमुग्धःकुलकन्यकोअ
नः।प्रथमसंभोगेनवावस्थानसंभोगाश्रयवाक्यादिनर्मनर्मस्फिजः।यथा।मामासोव
षमर्वराः।प्रियसुतासंकेतखंडुनेवेदृष्टिःसैपमनंबुदामृतमयीगात्राणिमेसिंचंति।किंजा
नासिविनादपिष्यतिमनःसततमेवायमेदुर्वात्येवानिवर्त्तयिष्यतिनसोस्तांदेवयानिंप्रति।

आविर्भूताभिलाषानुभावयोरकांडसंभोगभंगो नर्मस्फोटो यथा। इतः परानर्भकहार्यशस्त्रान्वै
३१७ 317 दर्भिपश्यानुमतामयास्मि। एवंविधेनाहवचेष्टितेनत्वंप्रार्थ्यसेहस्तगताममैभिः। कार्यहे
तोः स्वरूपविज्ञानादिप्रच्छादनं नर्मगर्भो यथा। अथाजिनाषाढधरःप्रगल्भवाक्ज्वलन्नि
वब्रह्ममयेनतेजसा। विवेशकश्चिज्जटिलस्तपोवनंशरीरबद्धःप्रथमाश्रमोयथा। उत्था
पकःपरिवर्त्तकःसंलापकःसंघात्यकइतिचत्वारिसात्वत्यंगानि। तेषुपरंपरिभूयाभ्युत्था
पनमुत्थापकोयथा। प्रहरममतुकार्यंप्राक्प्रहाराप्रियोहंमयितुकृतविघातेकिंविदध्याःप
रस्मात्। झटितिविततवन्येंगारभास्वत्कुठारप्रविघटितकठोरस्कंधबंधःकबंधः। प्रस्तुतार्थ राम

स्यागारस्त्यार्थ्य भजनं परिवर्त्तिको यथा। मुनिमभिमुखं तं। निनीषवो याः समुपयेयुः कमनीय
तागुणेन। मदनमुपरुधे स एव ताभ्यो दुरधिगमा हि गतिः प्रयोजनानां॥ सदसिताना वाक्यै
र्मिथ्याधिक्षेपः संलापको यथा। कथमपि न निषिद्धो दुःखिना भीरुणा वा द्रुपदतनयपाणि
स्तेन पित्रा ममापातव भुजवलदर्पाध्मायमानस्य वामो शिरसि चरण एष न्यस्यते धारयेनं।
कार्यमंत्रानुभावदेवादिभिः संघातभेदः संघात्यको यथा। अपरुपद्धिरिवेसानरणान्निवर्त्तते
गणः। मुखस्येव हि कछेषु संभ्रमादिगतमनाः। चतुर इत्यनेन शास्त्रीयलौकिकव्यवहारे वाद
तो नायकस्य धर्मार्थकाममोक्षेषु वैचक्षरायमुच्यते। उदात्त इत्यनेन आशयविभूत्योराभि

ज्ञातस्य यौवनादीनां चोत्कर्षः प्रकाश्यते। चतुर्वर्गफलं प्रबंधे कोवानवांधवीयतीत्यनेन श्रोतृणां रामादिवद्वर्तितव्यं
३१८ न रावणादिवदिति विधिनिषेधनिबंधनस्य प्रबंधस्याभीष्टतमत्वमाख्यायते मुखं प्रतिमुखमिति स्यादिना तु पंचांगं प्रबंध
318 शरीरमधीयते। तदंगानि चोपक्षेपपरिकरादीनि चतुःषष्टिरपि मुखादिष्वंतर्भवंति। यतस्तद्वदेव पंचसंध्यंकमपि
वाक्यं प्रबंधव्यपदेशमासादयति। तद्यथा। कथमपि कृतप्रत्यासत्तौ प्रिये इति मुखं स्खलितोत्तरे इति प्रतिमुखं
विरहकृशया कृत्वा व्याजं प्रजल्पितमश्रुतमिति गर्भः। असहनसखीश्रोत्रप्राप्तिप्रमादससंभ्रममिति विवलितदृशो राम
ति विमर्शः। शून्ये गेहे समुच्छ्वसितं ततमिति निर्वहणं। एतेन प्राचीनप्रबंधार्थेप्येकत्वा श्लोकेन प्रबंधत्वमिता ३१८
तं भवति। तद्यथा। तुरगनिचयव्याप्तानुर्वीमिदं सगराध्वरे कपिलमहसा रोषात्प्लुष्टान्पितुः प्रपितामहान्। आ

रिगतत रून्नतापस्तस्मात पाति भगीरथ्या भगवति तव स्पृष्टा नद्धिश्विरा दुदुरीधरता। अविस्तृतम संक्षिप्तमित्यनेन
विस्तारभीनूराणां कथारसविच्छेदशंकिनां च चित्तमावर्ज्यते। अत्र वृत्तमित्यनेन वृत्तांते रेण आश्वासकादिपरि
मानि रितिपरिश्रीताः श्रोतार आश्वास्यंते स्वर्गादिसंनिवेशादिवत्सं दर्भेण चाश्वासादेणा विभाव्यते। पुरोपवने स्था
दिना च देशकालपात्रसंपदुपवर्णनारालंबनोद्दीपनविभावाः कथ्यंते। उद्यानसलिलक्रिडाद्युपलक्षणेन का
मिनीरजनीद्विवाचेष्टाः। मधुपानं रते। सव इत्यनेन च रात्रिचेष्टा उच्यंते। विप्रलंभ इत्यनेन चत्वारोपि प्रथमानुरागा
द्यः परामृष्यंते। विवाहा इत्युपलक्षणेन प्रथमानुरागो विवाहांतः। मानः प्रेमांतः। वासः संगमांतः। करुणः प्रस
ज्जीवनांतः। प्रबंधे कर्तव्य इत्युपदिश्यते। मंत्र इतेत्यादि पुरुषकारापन्नसिद्धिसूचनेनाद्भुततादिनिरासान्नापक

स्यसत्त्वोत्कर्षःप्रकाश्यते।नावरागंनिमग्नापारेष्टाबायेत्यादिनानुपुरूषार्थ्योसन्तोपंकारित्वेनशैलतनयानंवंश्यो
३१९ श्यमधुपानरतोत्सवादीनांमंत्रदूतप्रयोगाजिनायकाभ्युदयादीनांचनियमेनप्रयोगःशेषाणांतुप्रबंधशा
रीराजेराधेनेतिप्रतिपाद्यते।गुणातःद्वागुणन्यस्यनायकेतेनविद्विषां।निराकरणमित्यनेनगुणावताभाव्यं
319 नगुणाद्वेषिरोतिज्ञाप्यते।वंशवीर्यश्रुतादीनिद्दत्यादिनापुराभिज्ञात्योद्दत्तश्रैर्शौर्यवीर्यादयएवशत्रोर्व
र्णनीयाःनत्ववद्वेद्देहेतवोन्याप्यावरणाविनयाद्यइतिप्रत्याप्यते।धिनोतिनइतित्वयमेवपक्षःश्रेयानिति
ग्रंथकारेणस्वाभिप्रायःप्रकाश्यते॥ ॥इतिनिगदितभंग्याम्नानंगसर्वस्वमेतद्विविधमपिमनोभिर्भावयं
तोस्तखेदाःतदनुभवसमुत्थानंदसंमीलिताक्षाःपरिशिवादिपरितोषंहंतसंतंप्रयांतु।यावन्मूर्ध्निहिमांशुकंदल

३२० मृतिस्वर्वाहिनीधूर्जटिरपीतदृक्षमितिकौस्तुभमस्तवकिंतंलक्ष्मीमुरद्विषि रामाःपावंचिन्नभुवस्त्रिलोकविजयप
प्रौढंधनुःकौस्तुभंभूयाच्चावदियंकृतिःकृतधियांकर्णावतंसोत्पलं॥ ॥इतिमहाराजाधिराजश्रीभोजदेव
320 विरचितेसरस्वतीकंठाभरणालंकारेरसविवेचनोनामपंचमःपरिच्छेदःसमाप्तः॥शुभमस्तु॥ ॥राम

नं ३३३

अदभुतार्कं वेन्ननाथपाठकस्य